Barcode : 99999990173296
Title -
Author -
Language - sanskrit
Pages - 88
Publication Year - 1907
Barcode EAN.UCC-13



॥ श्री ॥

तृतीया पाठावली

CHECKED IN
Initial

अनन्तशयने

भास्करमुद्रालयाधिपतिना

के. नारायणय्यकारियनेन स्वकीयमुद्रालये

मुद्रयित्वा प्राकाश्यं प्रापिता.

PRINTED & PUBLISHED BY THE PROPRIETOR,

K. NARAYANA AIYENGAR,

BHASKARA PRESS,

TRIVANDRUM.

1907.

Price 7 annas.

Sanskrit Reader.

हस्ते आगत मुक्तिः
ग्रं० सं० ..10:C/2
आगत सं० ..492.....
दि० ..9/.V:.1907..
एकुल ग्रन्थालय कार्यालयी.

No. III

BY

T. GANAPATI SASTRY.

PRINCIPAL,

H. H. The Maharajah's Sanskrit College,

TRIVANDRUM.

(SECOND EDITION.)

PRINTED & PUBLISHED

BY

K. NARAYANA IYENGAR,

Proprietor—"Bhaskara" Press,

TRIVANDRUM.

1907.

(Copy-right reserved.)

Price 7 annas.

॥ श्रीः ॥

तृतीया पाठावली.

अनन्तशयनस्थ-

राजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

तरुवै. गणपतिशास्त्रिणा

विरचिता.

(द्वितीयं संस्करणम्)

अनन्तशयनस्थ-

भास्करमुद्रालयाधिपतिना

के. नारायणय्यङ्कारित्यनेन स्वकीयमुद्रालये

मुद्रयित्वा प्राकाश्यं प्रापिता.

१९०७ क्रिस्त्वब्दः.

मूल्यं ७ आणकाः.

PREFACE. प्रस्तावना

To those who have read the second reader of this series, the lessons in this—the third—present little or comparatively no difficulty except perhaps that required by a progressive series. It contains both prose and poetry pieces mostly selected from the various readers in other languages as well as from the Maha Bharata and other Standard Sanskrit works. In the object-lessons and in those on biology and on morals, special care is taken to avoid all unnecessary length and minute details. The Samasas used are not too long; the main object of using them being to acquaint the students with a method of giving concise expression to their thoughts. With a view to enrich the vocabulary of students difficult synonyms are used whenever an idea is repeated. Sometimes suggestive words are coined to express ideas new to the language.

T. G.

निवेदना.

एषा तृतीयपाठावलीत्युच्यते. द्वितीयां पाठावलीमधीतवतां बालानां सुखेन ग्रहणयोग्याः पाठा अस्यां योजिताः. ते च गद्यरूपाः प्रायेण भाषान्तरपाठपुस्तकेभ्य उपात्ताः, पद्यरूपास्तु भारतादिभ्यः सङ्कलिताः. अत्र मनुष्यपशुपक्षिणां चरितं, स्थावरस्य स्वभावः, लौकिकी नीतिरित्येतावान् विषयोऽनतिसङ्क्षेपेण बालहृदयग्राहिण्या रीत्या प्रतिपादिताः; अदीर्घाः समासा अर्थसंक्षेपणरीतिज्ञानाय कतिपये प्रयुक्ताः; प्रसिद्धपदेन प्रथमं निर्दिष्टस्यार्थस्य पर्यायपदैः पुनः परामर्शः पर्यायपदपरिचयार्थं क्वचित् क्वचित् कृतः. पुराणकाव्यादावप्रसिद्धस्यार्थस्य प्रतिपादनाय नवोल्लिखितान्यपि कानिचित् पदानि झटित्यर्थसमर्पणे समर्थान्येव प्रयुक्तानि.

त. गणपतिशास्त्री.

विषयानुक्रमः.

विषयः	पृष्ठम्
१. मनुष्यस्य देहः शिरश्च.	१
२. सद्बालानां लक्षणम्.	२
३. भूमिः स्थलम्.	४
४. निर्बन्धः.	५
५. वञ्चको भृत्यः.	७
६. शीलम्.	८
७. विज्ञानफलम्.	९
८. अश्वो गर्दभश्च.	११
९. मूर्खा भृत्याः.	१३
१०. अपत्यविवादः.	१४
११. उपकारो न निष्फलः (क)	१५
१२. ,, (ख)	१७
१३. सत्पुत्राः.	१९
१४. जम्बुको द्राक्षा च.	२०
१५. शुनको बकश्च.	२१
१६. उदरमवयवान्तराणि च.	२२
१७. नासा चास्यं च.	२३
१८. जडसहवासः परमानर्थः.	२४
१९. निष्कुटः केदारम्.....	२६
२०. उद्यमः.	२८
२१. सत्यम्.	२९
२२. पृथिवी जलं च.	३०
२३. श्वा मार्जारश्च. (क)	३२
२४. ,, (ख)	३४
२५. गौर्महिषी अजा च.	३५
२६. ऋतवः.	३७
२७. कदली आम्रः.....	३८
२८. देवदर्शिनौ.	४१
२९. विद्यायामुद्योगः.	४१
३०. अन्धानां गजदर्शनम्.	४३
३१. सर्वानुरोधोद्यमः.	४४
३२. सामान्यनीतिः.	४६
३३. चक्षुः.	४८
३४. निमित्तम्.	४९
३५. क्षमा. (क)	५१
३६. ,, (ख)	५३
३७. मातृभक्तिः.	५५
३८. हिंसारसः.	५७
३९. अकृतज्ञोऽधमर्णः.	५८
४०. कुटुम्बैकमत्यम्.	६०
४१. मातापितृवाक्यलङ्घनम्	६१
४२. व्यायामः.	६३
४३. विकत्थनः कुमारः.	६७
४४. तस्करसत्यशीलौ.	६८

श्रीः ॥

तृतीया पाठावली.

मनुष्यस्य देहः शिरश्च.

विधाता तावदस्मानसृजदिति यूयं जानीध्वे. यथा वयं वस्तुं गृहाण्युत्पादयामः, एवमीश्वरोऽस्मज्जीवात्मनो वासाय शरीरं निर्मितवान्.

आत्मन आयतनभूते शरीरे शिरः कायः पाणिपादमिति त्रयो मुख्यभागाः सन्ति. अथवितास्तमात्रेऽस्मिन् देहे शिर एव प्राधान्यादुत्तमाङ्गमित्युच्यते. यथा तदात्मन इच्छयोन्नन्तुमवनन्तुं पार्श्वयोर्विचालितुञ्च पटु स्यात्, तथा तत् सन्निवेशितम्. प्रासादस्थ इव वातायनविवरेणास्मन्मुखावस्थितस्य नयनस्य द्वारेणात्मा समन्ताद् विद्यमानानि वस्तूनि पश्यति. शिरसो भागौ कपालं मुखञ्च. कपालमतिदृढविचित्रसन्धानैरष्टभिरस्थिभिर्निष्पादितम्. तदभङ्गुरत्वाय प्रव-

णाकारमनुपघाताय बाल लोमशाभिस्त्वग्भिराच्छादितं च वर्त्तते.

कपालान्तर्भस्तिष्कं वर्त्तते. तदेव बुद्धेः स्थानं प्राणाधारेष्वन्यतमं च. मुखे नयनाभ्यां सह नासा ऽऽस्यं श्रोत्रे च वर्त्तन्ते.

मानुष एक एव स्वभावतः शिर उन्नमय्य चरतीत्यतः स इहफलादुत्कृष्टममुत्रफलमर्जयितुमर्ह इति, अन्ये सर्वे जन्तवोऽधोमुखा एव सञ्चरन्तीत्यतस्त इहसुखमात्रायार्हा इति च शक्यमुत्प्रेक्षितुम्.

२. सद्बालानां लक्षणम्.

सन्तो बालाः प्रातस्तरां प्रबुध्येरन्; शय्योत्थायमीश्वरं ध्यात्वा स्नानेन शुचयो भवेयुः, यतः शरीरशौचमारोग्यमुख्यकारणेष्वन्यतमम्. अनन्तरं ते धौतमंशुकं परिधाय यथाकुलाचारं जपित्वाधीतं पाठं सम्यगभ्यस्येयुः; अथ यथोपपन्नमन्नमभ्यवहृत्य खाकर प्रतिदिवसं यथाकलं पाठशालायां सन्निदधीरन्. नतु जातु-

चित् शिरोवेदनेति वा, उदरबाधेति वा, गृहे श्राद्धादिकमिति वा वृथा व्याजानुल्लिखन्तो गृह एव विश्राम्येयुः; कुत इति चेत्—ते तारुण्यावस्थायां जीविकाव्यापारेषु तथा व्याजोल्लेखनमशक्यमिति स्वयमेव जानीयुः. अभ्यस्तं पाठं तत्र सम्यग्विशोध्योपाध्यायस्योपदेशानेकाग्रमानसा गृह्णीयुः.

किञ्च ते पाठशालायामुपाध्यायस्य सच्छात्राणां वा वैमनस्यमल्पमप्यजनयन्तः सर्वदैव विनीता वर्तेरन्; स्वानि पुस्तकानि पांसुस्वेदादीनामनुषङ्गाद्रक्षेयुः; पुराणान् पाठान् मुहुश्चिन्तयेयुः, तत्र सम्यक्प्रतिभातान् विषयान् सच्छात्रं गुरुं वा पृष्ट्वावधारयेयुः.

दैनंदिनाध्ययने वृत्ते गुरुणा दत्तायां गृहगमनाभ्यनुज्ञायां विद्यया सह कायबलस्याप्यवश्यार्जनीयतया ते समानवयस्कैर्बालैः साकं क्रीडेयुः. अव्यायामो हि जनो रोगी भवेत्; रोगिणश्च बलं हीयेत; अबलश्च महापण्डितोऽपि परस्यात्मनो वा नेषदप्युपकाराय कल्पेत.

एतच्च मुख्यं लक्षणं सतां बालानां — यत् ते मातापित्रोर्हितोपदेशवाक्यान्यादरेण शृण्वन्तः सर्वेषु कृत्येषु तयोर्मतमनुसरेयुः.

यस्तु स्वच्छन्दवृत्तिः पित्रोर्हृदयं दुनोति, स बालको दण्डनामवश्यं लभेत.

---

२. भूमिः स्थलम्.

अस्माभिरध्युष्यमाणा भूमिर्विपुला नारङ्गफल-वल्लिरतल्यकृतिश्च विद्यते. प्रायोऽस्याः $\frac{2}{3}$ भागो जलमयौ, $\frac{1}{3}$ भागः स्थलम्. यद्येवं भूमेरवस्थितिर्नाभविष्यत्, तदा मनुष्यभोग्यः सर्वोऽपि स्थलभागो बहोः कालात् प्रागेव भूशमुच्छुष्को मरुरभविष्यत्. भूमावुन्नताः पर्वता गिरिपादा निम्नदेशा आजयश्च सन्ति. पर्वतेषु प्रस्रवणानां तच्छिखरेषु हिमघनानाञ्च भावात् तेभ्यो नगनिम्नगाः सिन्धवश्चोत्पद्य समन्तात् स्यन्दमानाः स्थलं कृष्यर्हं कुर्वन्ति. अनतिदन्तुरा भूमिरुजिरित्युच्यते, सममूमिरिति च. उन्नतेऽवनते समे वा प्रायः सर्वस्मिन्नपि स्थले नानाविधा वृक्षाः पुष्पलताः

सस्यानि तृणानि चोद्भिद्य भूमिमलङ्कुर्वन्ति. उ-
ष्णदेशेषुच्छायाया अवश्यमपेक्षणात् छायावृक्षा बहुला
जायन्ते, स्तोकोष्णेषु तु न तथा. भूमेरतिशीतलयो-
र्दक्षिणोत्तरभागयोर्वृक्ष एव न प्ररोहति, किन्तु कृशानि
लशुनानि तृणानि च केवलम्. भूमेरूर्ध्वं ऊर्ध्वं शै-
त्यस्य अन्तरन्तरूष्मणश्च क्रमेणाधिक्यमुपलभ्यते. भू-
मेरुपरिकपालं क्रोशपञ्चशतीमात्रमिति, ततस्तस्या गर्भे
बहुप्रकारा लोहादयः पदार्थाः कथिता द्रवीभूय प्रव-
हन्तीति च पण्डिता अभ्युह्य वर्णयन्ति.

हठ

४. निर्बन्धः.

कुतश्चिद् ग्रामाद् ग्रामान्तरं गच्छन् पान्थः
कश्चिद् द्रामिलः कस्यापि सरसस्तीरे स्थितस्य तरोरेक-
कस्य मूले स्वीयमश्वं बद्ध्वा जलाभ्यर्णे पाथेयमभ्यव-
हरन्नासाञ्चक्रे. तदा कश्चन पथिको यवनस्तत्र विश्रमा-
र्थमवतीर्य स्वीयमप्यश्वं तत्र वृक्षे बन्धुं तदन्तिकमुप-
ससार. तथाभूतं तमालोक्य स भुञ्जानो द्रामिल उच्चैः-

कारमाचचक्षे — 'ममाश्वो बलवानदान्तश्च; दुर्बलं तवाश्वं मा तेन साकं भान्त्सीः' इति. यवनस्तु 'तत्रैव बध्नीयाम्' इति सनिर्बन्धस्तं बद्ध्वा तत्रैव तीरे नातिनिकटोपविष्टो भोक्तुमारेभे. ततः क्षणान्मिथ आरब्धकलहं तदश्वयुगलं यावत् तत्स्वामिनौ द्रुततरमागत्य विनिवारयतस्तावद् द्रामिलाश्वो यवनाश्वं निर्दयशनैः पादाघातैश्च प्रमीतं चकार. अथ कुपितो यवनो हठाद् द्रामिलमाकर्षन् प्राड्विवाकमुपगम्य 'ममाश्व एतदश्वेन हतः; तदनेन तन्मूल्यं दाप्यम्' इति प्रार्थयत. ततः 'किमत्रोत्तरं वदसि' इति प्राड्विवाकेन बहुकृत्वः पृष्टोऽपि द्रामिलः किमप्यब्रुवन् मूक इव स्थितः. तदा प्राड्विवाको यवनं जगाद—'मूकः खल्वसौ; किमनेन कुर्याम्' इति. पुनर्यवनोऽब्रवीत्—'आर्यमिश्र! कुहकोऽयं न तु मूकः यतो मय्यश्वबन्धनाय वृक्षमूलमुपसरति "तत्र त्वदश्वं मदश्वेन सह मा भान्त्सीर्मा भान्त्सीः" इत्युच्चैरुद्घोषति स्म' इति. प्राड्विवाकस्तद्वाक्यं श्रुत्वा प्रहस्य 'तर्हि त्वद-

श्वमूल्यमनेन दापयितुं न कश्चिद् न्यायोऽस्ति' इत्युक्त्वा यवनं विसर्जयामास.

५. वञ्चको भृत्यः.

कोऽपि धनिको महता मूल्येन क्रीतमेकं मरकतरत्नं स्वभृत्यस्य हस्ते समर्प्य 'रत्नमिदं मम गृहिण्याः करं प्रापय' इत्युक्त्वा तं प्राहिणोत्. स भृत्यो यथाऽऽज्ञं नियोगमकृत्वा तद्रत्नं लोभात् स्वायत्तं चकार. पश्चाद् गृहमागत्य 'क्व तद् भृत्यानीतं रत्नम्?' इति धनिके गृहिणीं पृच्छति सा 'न किमप्यहं जानामि' इत्यवोचत्. सद्यः स्वामिनाहूय 'अपि तद्रत्नं यथानिदेशं प्रापयः!' इति पृष्टो भृत्यः 'अथकिं, प्रापयम्' इत्युवाच. ततो धनिकेनमसत्यं निवेदितो राजा भृत्यमाहूयापृच्छत. तदापि स 'मत्स्वामिगृहिण्याः करे रत्नमार्पयम्' इत्येवाब्रवीत्; तत्र च साक्षिसत्तां प्रति राजनि पृच्छति द्वौ साक्षिणौ विद्यमानावाह स्म. अथ तावप्यानायितौ भिन्नदेशस्थौ कारयित्वा राज्ञा प्रथमं

चोदिता धनिकगृहिणीं 'भृत्यो मरकतं मह्यं न दत्त-
वान्' इत्यब्रूत. ततो धनिको भृत्यश्च रत्नस्य प्रमाणं
प्रति प्रत्येकं पृष्टौ 'तिन्त्रिणीबीजमात्रं तद्' इत्यब्रू-
ताम्. साक्षिणोस्तु प्रत्येकं पृष्टयोरेको 'द्राक्षाफलप्रमा-
णम्' इति, अपरो 'लिकुचप्रमाणम्' इति च व्य-
ब्रूताम्.

एतेन राजा कूटसाक्षिणावेनौ निश्चित्य तयोर्द-
ण्डमकल्पयत्. पश्चादेतौ सानुतापौ सत्यं विज्ञाप्य 'क्ष-
मस्वापराधम्' इति राजानं प्रार्थयाञ्चक्राते. धूर्तो भृत्य-
स्तु स्वप्रयुक्तायाः परवञ्चनायाः स्वानर्थहेतुतां दृष्ट्वा त-
द्रत्नं प्रत्यर्पयामास. राजा च तद् गृहीत्वा धनिकाय
ददौ.

तरंगः
६. शीलम्.

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतद्विदुर्बुधाः ॥ १ ॥
सज्जनो
वृत्तं यत्नेन संरक्षेद्वित्तमायाति याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥ २ ॥

यथा मलिनवस्त्रेण यत्र क्वाप्युपविश्यते ।
एवं चलितवृत्तेन वृत्तशेषं न रक्ष्यते ॥ ३ ॥
न कुलं वृत्तहीनानां प्रमाणमिति मे मतिः ।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ४ ॥
अकुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्दान्तः स कुलीनशताद्वरः ॥ ५ ॥
शीलं रक्षतु मेधावी प्राप्तुमिच्छुः सुखत्रयं ।
प्रशंसां वित्तलाभं च प्रेत्य स्वर्गे च मोदनम् ॥ ६ ॥
विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ७ ॥

भुङ्क्ते मितं यः कृतसंविभागो
मितं च निद्रात्यमितं प्रयत्य ।
स्वं याचितश्च द्विषतेऽपि दत्ते
जहत्यनर्थास्तमुदारशीलम् ॥ ८ ॥

---

७. विज्ञानफलम्.

'ज्ञानं सर्वार्थसाधनम्' इति वाक्यं विद्वन्मु-

खात् कोऽपि राजा निशम्य तस्य यथार्थतां परीक्षितु-
कामः स्वपुत्रयोर्द्वयोः कनीयांसं शास्त्राध्ययनाय सदा-
चार्यस्यान्तेऽवासयत्, ज्येष्ठाय च कालेकाले प्रचुरं ध-
नमात्रं ददानोऽवर्तत. क्रमेण कनीयान् विद्यायां स-
दाचारे च परिनिष्ठितोऽभवत्. ज्येष्ठस्त्वनुक्षणमुपैधमान
धने मदमानभरितो बभूव. तयोर्यौवनदशामधिरू-
ढयोः कुतोऽपि हेतोर्दैवीयान् विदेशो गन्तव्य आसीत्.
पूर्वजः सञ्चितं स्वधनमखिलं गृहीत्वा तमभि प्रतस्थे.
अनुजः पुनर्विद्यामेव विदेशे सहायं मन्यमानः स्तो-
कमपि धनमनादाय तमन्वगच्छत्. प्रयाणके क्वचिद्रा-
त्रौ चौरेषु धनपेटिकां लुण्ठितुमुद्युक्तेषु दैवात् तत्स्वा-
मी प्राबुद्ध. ततस्ते तामलुण्ठित्वैव पलायन्त. अथापि
तदा प्रभृति त्यक्तनिद्रं दिवानिशं धनरक्षणार्थं खिद्य-
मानं भ्रातरं दृष्ट्वानुजेनापि तत्र साहाय्यं कृतमासीत्.
ईप्सितं च देशं तयोरासादितवतोर्ज्येष्ठः कनिष्ठाद् वियु-
ज्य विवेकशून्यतया वृथाविनियुक्तसर्वद्रव्योऽधमर्णी-
भूयान्ते कारानिरोधं प्रपेदे. कनिष्ठस्तु तत्रत्यं राजकीयं

विद्वत्समाजमाश्रित्य तत्संवासरसिकोऽवर्तिष्ट. श्रुत्वा चास्य गुणोत्कर्षं तद्देशाधिप एनमाहूय स्वान्तिके वासयांबभूब; सुप्रीतश्चास्मै कन्यामात्मनः संप्रददे; सदारं चैनं प्रभूतधनपरिवारं कृत्वा स्वदेशं प्रति प्रास्थापयत्.

इत्थंभूतमेनं प्रत्यागतं वात्सल्यात् पिता भृशमभ्यनन्दत्. काले स कियति व्यतीते ज्ञानसत्यनीतिभिर्धैर्यदयादिभिश्च महागुणैः शोभमानं राजपदार्हमेनं मन्यमानः स्वराज्येऽभ्यषिञ्चत्. अथ प्राप्तराज्योऽयं विज्ञाय चरमुखाज्ज्येष्ठवृत्तान्तं भृशदुःखितस्तूर्णमेव तन्मृणाद् विमोच्य स्वपुरमानिनाय. एतेन—

"अशेषाभ्युदयोत्पादनिदानत्वान्न केवलम् ।
इतरानपहार्यत्वादपि विद्योत्तमं धनम् ॥"

इत्ययमर्थो निर्णीतः.

—०※०—

८. अश्वो गर्दभश्च.

मृगा नाम नानाजातीयाः. तत्र केचिदारण्याः केचिज्जानपदाः. तेषु केचिन्मनुष्याणां भृशमुपकाराय

भवन्ति. अश्वा हि तीक्ष्णबुद्धयो महनीयाः मृगाः. वन्याश्वा गर्दभेभ्योऽपि निकृष्टरूपाः. उभये चैते एण्याखण्डमध्ये बहुलाः सन्ति. अश्वाः स्वं स्वामिनं सम्यग् विजानन्ति. तस्य कैङ्कर्यं निर्व्याजमाचरन्ति; तद्वचनतात्पर्यं, प्रग्रहेण जानुभ्यां चरणाभ्यां च तेन क्रियमाणाः संज्ञाश्च विदित्वा तदनुसारेण वर्तन्ते. जवनास्ते निमेषद्वयेनार्धक्रोशं गच्छन्ति. पारसिकदेशोत्पन्नास्त उत्तमा इति प्रसिद्धाः. तान् पारसिकाः कुडुम्बानीव पुष्णन्ति. वृषभा इवाश्वाः शकटान् हलानि च कर्षन्ति; मनुष्यांस्ततोऽपि गुरुतरान् भारांश्च वहन्ति. गर्दभा अप्येवम्.

ग्रामगर्दभा अल्पाकृतयो गतौ बुद्धौ च मन्दाः. सहनतया निसर्गतो दान्ततया च ते न गण्यन्ते, न च रक्ष्यन्ते. तान् भारतीया मार्गपरिसरेषु, ग्रामबाह्यदेशेषु चाभ्यवहारगवेषणायै विसर्जयन्ति; तेषां पृष्ठेषु महान्तं भारमारोपयन्ति; तद्वशाच्च तान् स्खलतो दण्डप्रहारैर्विद्रावयन्ति. पुनररण्ये देशविशेषे च समु-

ञता दृढदेहबन्धा बलवन्तो गर्दभाः सन्ति. पुरा प्रभवस्तान् वाहनीकरणेन रथ्यीकरणेन चोपायुञ्जत. अद्यत्वेऽपि ईजिप्त, स्पेयिन, अमेरिकादिदेशेषु जना गर्दभानत्यर्थमाद्रियन्ते. तत्र गर्दभानां पादा न स्खलन्ति. अश्वापेक्षया तेषां तीक्ष्णतरा बुद्धिः; आयुश्च दीर्घतरम्.

९. मूर्खा भृत्याः.

पुरा दक्षिणापथे बहुवित्तपरिजनः कश्चित् धनिक आसीत्. स कदाचित् स्वशिबिकावाहिनो गवार्थे तृणानयनायादिदेश. तेऽवदन्—'वयं शिबिकावहनं विना नान्यत् कर्म कुर्याम' इति. स पुनरपि कचिद्दिने नष्टस्य गोवत्सस्यान्वेषणाय तानादिक्षत्. तदापि ते 'वयं शिबिकावाहिनो न गोपालकाः' इति वदन्तः स्वाम्याज्ञामत्यवर्तन्त. ततस्तेषां सद्बुद्धिमुत्पादयितुमिच्छुर्धनिकः शिबिकानयनाय तानाज्ञापयत्; उपस्थापितां शिबिकामधिरुह्य मध्याह्ने तैरुह्यमानः गोवत्सान्वेषणाय प्रस्थितः कण्टकाकीर्णासु ग्रामबाह्यस्थ-

लीषु शिबिकावाहांस्ततइतो गमयन् खेदयामास. ते चिरमुग्रातपे भारवहनाच्चङ्क्रमणाच्चोपहतजानुपादा 'इतः परं चलितुं न शक्नुमः' इत्यवसन्नगात्रा आचक्रन्दुः. स्वामी तान् निर्भर्त्स्य 'शिबिकावहनं युष्माकं नियोगः, अतो मा स्म तिष्ठत, गच्छत शीघ्रम्' इति चोदयन्नतीव श्रमयाञ्चकार. तदा प्रभृति लब्धविवेकास्ते न जातुचित स्वाम्याज्ञामुदलङ्घयन्.

---

१०. अपत्यविवादः.

गृह एकस्मिन्नेकापत्ये द्वे स्त्रियावावसताम्. कस्यचन रात्रौ तयोरेकस्या अपत्यं मृतमभूत. तदादाय तन्मातान्यस्याः स्वपत्याः पार्श्वे निभृतं निधाय तदीयमपत्यं स्वयमपाहरत्. प्रभाते च ते 'जीवदपत्यं मदीयं मदीयम्' इति विवदमाने राजानमासेदतुः. स च साक्ष्यभावाद् निर्णयोपायं मनसिकृत्य वधाधिकृतमाहूय 'जीवतः शिशोश्छिन्नस्यैकमर्धमेकस्या अपरमर्धमन्यस्यै च दीयताम्' इत्यादिष्टवान्. तच्छ्रुत्वा तयोरेका

'न्याय्योऽयं निर्णयः. छिद्यतां शिशुः' इत्याह स्म. अन्या तु वेपमानावयवा 'राजन्! शिशुरेष तस्या एव दीयताम्; सर्वथा मैनं मारयत' इति प्रार्थितवती. ततश्चेयमेवापत्यवत्सला शिशोर्मातेति निश्चिन्वंस्तस्यै स शिशुं समर्पयितुमादिशत्; प्रत्यर्थिनीं च ताडयित्वा कारागृहे निवेशयामास.

११. (क) उपकारो न निष्फलः.

कदाचित् प्रातः कश्चन बालो गृहीतपाथेयो दिनान्तात् प्रागेव प्रतिनिवर्तितुं कृतनिश्चयो ग्रामान्तरं प्रस्थितः. मार्गे कोऽपि श्वा गच्छन्तं तमुत्पुच्छयमानः प्रत्यासदत्. श्वा क्षुत्पीडित इत्याकारेण विदित्वासौ बालः कृपार्द्रमना आत्मनोऽन्नहानिमगणयन् पाथेयात् कवळमेकं तस्मायार्पयत्. ततः किञ्चिद् दूरमतिक्रान्तो ऽयं जरत् कञ्चिदध्वं मार्गपतितमालोक्य तस्य बुभुक्षातुरतया स्पन्दितुमपि शक्त्यभावं विज्ञायेत्थमचिन्तय—'यद्यहमस्य तृणाहरणार्थं कांश्चित् क्षणानुपयुञ्जीय, तदा स्वग्रामाय प्रतिनिवर्तनात् प्राक् सूर्यो

ऽस्तं गच्छेत्. चौरप्रचुरश्चायं पन्थाः. तथापि मृग-
रक्षणमेव परमो धर्मः' इति तृणेतरस्तृणान्याहृत्य चासौ
तस्याग्रे व्यकिरत्. तेषां चर्वणादश्व उपशान्तक्लमः शै-
नैरुत्थाय चलितुं प्रवृत्तः. ततः किञ्चिद् दूरं गतः सरसि
तिष्ठन्तमितिकर्तव्यतामूढमिव लक्ष्यमाणं काञ्चित्पुरुष-
मवलोक्य 'भोः! किं तत्र करोषि?' इत्यपृच्छत्.
'भद्र! अहमन्धः; प्रमादात सरसि पतित इतश्चलितुं
बिभेमि' इति स प्रत्युवाच.

बालको 'हन्तैवं मम समयो हीयते, अन्धश्चा
यं नोपेक्षणीयः' इति विचिन्त्य अवनतपूर्वकायः करं
प्रसारयामास. तमवलम्ब्यान्धः पन्थानं प्रतिपन्नः
'कारुणिक! मत्प्राणत्राणकारिन्! न ते दुःखं भवि-
ष्यति' इत्याशिषा बालमभिननन्द; अकथयच्च—
'भद्र! इतो मदर्थं कालं मा हार्षीः, अहं कथंकथमपि
स्खलित्वा स्खलित्वा गृहमासादयेयम्' इति. ततस्तवा
दिनान्तस्य प्रत्यासन्नत्वाद् विज्ञापहृतस्य समयस्य
प्रत्यापत्तये महान्तं वेगमाश्रित्य धावति बालेऽन्यः

प्रत्यूह आपतितः. पङ्गुर्हि कश्चित् पर्वण चरन् 'प्रभो! ईशस्त्वामभिरक्षतु. युद्धे नष्टिकभिक्षुपादः पङ्गूभूतो दीनोऽहम्. क्षुन्मामतीव पीडयति, यत्किञ्चिदभ्यवहाराय देहि' इति बालमयाचत. बालः पाथेयभाण्डस्थं भुक्तशिष्टं सर्वं तस्मै समर्प्य द्विगुणवेगं धावन् दिनावसाने ग्रामान्तरं प्रापत्; तत्र च कार्यं निर्वर्त्य स्वगृहं प्रत्यागच्छन् कतिपयैः क्षणैः परितः प्रसृत्वरे तमसि भ्रष्टवर्त्मा किमपि वनं प्रविश्य बभ्राम.

---

१२. (ख) उपकारो न निष्फलः.

वने तस्मिन् स बालो यत्नेनान्विष्यन्नपि मार्गमनुपलभमानः क्वचन शिलातले शयितः 'अहो बत ममेदृशी भवितव्यता' इति सक्रन्दमरोदीत्. तदा प्रातर्वितीर्णाहारः स श्वा कमप्यल्पकं भक्ष्यपूलं ग्रन्थौ सन्दश्य यदृच्छयाऽऽपतंस्तद्ध्वन्यनुसारेण तदन्तिकमुपससार; तदग्रे च तं भारं चिक्षेप. बालस्तं श्लथीकृत्य तत्स्थं भक्ष्यजातमभ्यवजहार; 'अहो शुनेऽपि कृत उपकारो न व्यर्थो जात' इत्यभिधाय तदङ्गं च

प्रीत्या परामर्शं. ततः किञ्चिदिव शान्ते श्रमे सराणिंग-वेषणाये पुनरुद्यतस्य ततश्चरतस्तस्य पादौ तीक्ष्ण-कण्टकक्षतावभूताम्. तद्व्यथया गन्तुमशक्तस्तत्क्षण-प्रसृते चन्द्रिकाप्रकाशे दिवासम्भावितमक्षं तत्र तृणानि भक्षयन्तं दृष्ट्वा तत्समीपमगमत्. ततः करतलपरामर्शै-रतमुपलाल्य यावदयमारुक्षामदर्शयत्, तावदश्वः स्व-पृष्ठे तमारोप्य समीचीनं पन्थानमवाहितः प्रापयांच-कार. बालो 'यद्यहं प्रागिममश्वं नारक्षिष्यं, ध्रुवं तत्र कान्तारे महाक्लेशमन्वभविष्यम्, दिष्ट्या सुकृतमकर-वम्, न हि तत फलमनुत्याय विरमति' इति तुतोष.

ततो गच्छतस्तस्य द्वौ चौरावागत्य वस्त्राणि चोरयितुमारभेताम्. किन्तु पूर्वोपकृते शुनि तत्क्षण एव प्रधावितामिगते स्वपादौ दन्दश्यमाने, 'इतस्ते पापास्तिष्ठन्ति, शीघ्रमागच्छत, तान् निहन्मः' इत्यु-च्चस्वरायां च वाचि श्रूयमाणायां तौ चौरौ पलायिषा-ताम्. किमिदमिति च पश्चाद्दत्तदृष्टिः स बालो दिवा-भुक्तस्वान्नशेषं तं पङ्क्तमात्मनैव तटाकादुच्चारितस्य

तस्यान्धस्य स्कन्धेऽधिरुह्यागच्छन्तमपश्यत्. तञ्च स पङ्गुर्जगाद — 'तात! कुत्रचन मार्गद्रुममूले शयाना-वावां "कश्चिदेकाकी जनो गच्छति, तं प्रहत्य मुष्णीवः, आयाहि" इति कामपि वाचमशृणुव. ततस्त्वामेवैकाकिनं प्रत्यागच्छन्तं सम्भावयन्तौ मदुपन्यस्यमानमार्गे मां स्कन्धेन बहत्यन्धे ह्यावपीहागत्य चौरत्रासनामुद्घोषणामकार्ष्व. सेयं दैवात् तवोपकारायाभूदिति महानावयोः प्रमोदः" इति. श्रुत्वा चैतद् बालो भृशमतुषत्; तदाप्रभृति च मनुष्ये मृगेऽन्यस्मिन् वा प्राणिन्यार्ते दृष्टे नियमेनोपकारपरो बभूव.

---

१३ सद्गुत्राः.

शिखिशिलिह्वीपे एतन्नामधानः कश्चिदग्निपर्वतोऽस्ति. स स्वभावात् शिखरेभ्योऽग्निं द्रुतशिलाद्रवांश्च कदाचिदुद्गमेत्. शिलाद्रवाश्च प्रच्युत्य पर्वतप्रान्तदेशेषु स्यन्देरन्. पुरा कदाचित् तान् बहुलमुद्विराति तस्मिन् गिरौ तत्परिसरग्रामेभ्यो जनाः स्वस्वधनेषु प्रशस्तान्यादाय प्राणपरित्राणार्थमन्यत्राधावन्. तैः सह

स्वकीयधनानि गृहीत्वा गच्छन्तौ द्वौ भ्रातरौ जराजर्जरतया सहसा सहचरितुमक्षमं पितरं मातरञ्चावेक्ष्य 'आवां प्रसूय पुष्टवद्ध्यां मातापितृभ्यां श्रेष्ठं न किञ्चिदनं लोकेऽस्ति' इति मिथः कृतविमर्शौ सर्वस्वपरित्यागेनापि मातापितृरक्षणमेव परमं धर्मं निरचिनुताम्.

ततश्च शिरःस्थं सर्वं प्रशस्तधनभाण्डजातं दूरे निरस्य ज्येष्ठः पितरमन्यो मातरं च पृष्ठे समारोप्य वहन्तौ भयशून्यं स्थलं प्रापयाञ्चक्रतुः. ताभ्यां च मातरपितरौ वहद्भ्यां यया वर्त्मा प्रचलितं, तस्यास्तदा प्रभृति 'सत्पुत्रमार्ग' इति नाम प्रसिद्धमभूत.

१७. जम्बुको, द्राक्षा च.

कदाचित् कश्चिज्जम्बुक आहारार्थमटाट्यमानः कुत्रचिद् द्राक्षालतायां लम्बमानं पीतरफलजालं मनोरमं वृन्तमेकमपश्यत्; उन्नम्योन्नम्य च तद् वृन्तमुच्चेतुं यावच्छक्ति प्रयत्नमकरोत्; तथाप्युन्नतदेशस्थ-

तया तद् ग्रहीतुं न शशाक. एवमात्मोद्यमं विफलमवधार्य 'धिक्धिगम्लमेवेदं द्राक्षाफलम; यदीच्छेयं, किमहमिदमनायासेन नोच्चिनुयाम ?' इति उपांशु जल्पन् सावज्ञ इव स जगाम. एतेन लिप्सिते पदार्थे तदलाभनिश्चयानन्तरमनिच्छाया अभिनयनमुपहसनीयमिति फलति.

शुनको वक्ष्य.

कश्चिज्जपोत हत्वा सगर्धं भक्षयतः कस्यचित् शुनकस्य कण्ठनाले अस्थिशकलमेकमलगत. स तत् स्वयमुद्धर्तुं कथञ्चिदप्यशक्नुवन् बकं कञ्चिदुपगम्य 'यदि त्वं मद्गलविलग्नमस्थिखण्डं दयया समुद्धरेः, तर्ह्यवश्यमनुरूपं ते पारितोषिकं दद्याम' इति प्रार्थयत. बकश्च 'तथा' इत्यभिधाय, दीर्घां स्वग्रीवां व्यास्ये तदास्ये प्रसार्य चञ्चवग्रेण शनैस्तदस्थिखण्डं बहिर्निस्सारयामास. ततः 'क तत् त्वया प्रतिश्रुत पारितोषिकम्' इति पृच्छन्तं तं बकं 'अरे मूढ! मद्गन्तान्तरालोपनतं तव शिरो झगित्यदशता मया यद्

पेक्षितं, तत् किमनुरूपं ते न पारितोषिकम्?' इति स उक्तवान्. एतेन क्षुद्रेषु प्रत्युपकारप्रत्याशा न कार्येति सिध्यति.

---

१६. उदरं अवयवान्तराणि च.

कदाचिदवयवाः सर्वे सम्भूय 'कुक्षिं पूरयितुमस्मासु श्रद्धयानुवेलं प्रयस्यत्सु फलमेव केवलमस्मत्प्रयासस्यानुभवन् स्वयमयं तूष्णीमास्ते' इत्युपजातासूयाः कुक्षिणा सहाकलहायन्त. ततः 'अद्यारभ्य कुक्षिं न वहेव' इति पादयोः, 'आस्ये नान्नमर्पयेव' इति करयोः, 'अन्नमादाय न गिरेयम्' इत्यास्ये च वदत्सु, दन्ता 'नान्नादिकं मृदूकुर्याम' इत्यब्रुवन्. 'अन्नं नान्तरवतारयेयम्' इति कण्ठनालमकथयत्. एवं मिथः मन्त्रिता कृतसंविदः सर्वेऽवयवा दिनद्वयं निर्व्यापाराः स्थिताः. तृतीये दिवसे कुक्षावाहारानर्पणात् प्राप्तकार्श्ययातनाः सानुतापाः सद्यः स्वस्वकर्मसु यथापूर्वं व्यापरितुमारेभिरे. इत्थञ्च सर्वासु जातिषु कञ्चित् प्रधानं कृत्वा

कैश्चित् तदुपासना कर्तव्यैवात्महितायेति फलति.

२७. नासा चास्य च.

मुखस्यैकदेशभूतया नासया गन्धं गृह्णीमः. सास्मत्सुखविरोधिनो वस्तुनः सत्तां आराद्गागमनं च निवेदयति; अचारोरभ्यवहारस्य कवलनं नानुमन्यते. एतदर्थमेवास्यस्य ऋजुरेखोर्ध्वभागे सा भगवता संश्लेषिता. तद्द्वारा श्वसिमो वयम्; प्राणाश्च श्वसितेन धियन्ते. मृदुलमेकमस्थि नासानालदण्डो भूत्वा नासारन्ध्रे विभजते. तत्र विद्यमानानि लोमानि परागादेरन्तःप्रवेशं वारयन्ति. पन्थाः कश्चिन्नेत्राभ्यां नासामुपतिष्ठते; तेन नयनयोरश्रु मुञ्चतोर्नासिका निष्यन्दिनी भवति. एवं नासाया आस्यान्तस्य च द्वारमस्ति.

अस्माकं व्याहरणे भोजने च करणमास्यम्. ओष्ठौ दन्तान् पालयतः. अत एतौ दन्तवाससशब्देनोच्येते. आहारं च तौ तेषु लघूकुर्वत्सु बहिरवपातादरक्षतः. उच्चारणे च केषाञ्चिद्वर्णानां तावनुकूलौ भवतः. दन्ता ऊर्ध्वपङ्क्तावधरपङ्क्तौ च षोडशशः द्वात्रिंशत्

सन्ति. राजदन्तौ विशालौ सतलौ चारू च. ताभ्यां वयं दशामः. तदनन्तरं स्थिताः श्वरदसदृशा निशिताग्रा रदना अभ्यवहार्यखण्डने, पार्यन्तिका दन्ताः सतलत्वात् सुखजीर्ण्यनुगुण्येनाभ्यवहारमृदूकरणे चोपयुज्यन्ते.

आस्वाद्यस्य रसमास्येोर्ध्वभागेन संयुक्त जिह्वा वेदयते. वर्णविशेषान् प्रति तयोत्पत्तिस्थानतापि वर्तते.

मनुष्यभिन्नाः प्राणिनः स्वाभिप्रायमुच्चावचैर्ध्वनिभिराविष्कुर्वन्ति; भाषणं तु तेषामशक्यम्. मनुष्यः खल्वेकः स्वाशयं वाचा प्रकाशयितुं शक्तः.

---

१८. जडसहवास. परमानर्थः.

नानारूपाणि दर्शनीयानि नगरे सन्तीति श्रुत्वा पूर्वं कश्चिज्जडस्तानि द्रष्टुकामो दूरात् स्वग्रामात् किञ्चित् स्वस्यालाध्युषितं नगरं जगाम; तत्र स्यालगृहे रात्रौ सर्वेषु भुञ्जानेषु प्रदीप्तसञ्जिरे कमपि दीपाविशेषं

ददर्श; विस्मितश्च स्यालं पप्रच्छ 'किमिदम्' इति. नागरिकोऽस्य जडिमानं मनसोपहसन्नुवाद 'स एष दुष्प्रापः सूर्यशाबको नाम सांयात्रिकैर्दवीयसः समुद्रद्वीपादिहानीत' इति. स भ्रान्तो यथाजातः 'ईदृश वस्त्वस्मद्ग्रामस्था वीक्षमाणा विस्मयरेन्' इति मत्वा दीपलुण्टनायावसरप्रतीक्षी स्थितः. भुक्त्यनन्तरं च सर्वेषु स्वस्वकर्मणि व्यासजत्सु स ग्राम्यः 'स्वग्रामं प्रति प्रस्थानसमये नेष्यामी'ति कृतनिश्चयस्तं दीपमन्याविदितं गृहीत्वा तस्य गृहस्य पटलान्तराले निलीनयामास. क्षणेन तत्र सन्दीप्तोऽग्निः पटलं गृहं तद्गतं धनं च निर्ददाह. तत्र शान्तप्राये ज्वलने गृहस्वामिन्यौपवेशिकेषु च दग्धावशिष्टं विचिन्वानेषु ग्राम्योऽपि अन्वेषणव्यग्रस्तत इतो भस्मकूटं परिवर्तयञ्छोलयंश्च चचार. अन्यैर्विच्छे समापितेऽपि त्यक्त्वात्यक्त्वा लभ्यमानमन्वेषणानुवर्तनेन श्राम्यन्तं तमपरे जगदुः—'भद्र! किं नाम भवानतिचिरमन्विष्यन्नेवं क्लिश्यते!' इति. स बभाण—'गृहेऽग्निसंदीपनात् पूर्वं सूर्यशा-

बको मया गृहपटले निहितः. सोऽयमिदानीं गवेष्यमाणो न क्वापि लभ्यते' इति. तच्छ्रुत्वा जनास्तं सन्ताड्य सद्य एव नगरान्निष्कासयामासुः. किन्त्वेतावतापि स मूर्ख आत्मसन्ताडनकारणं न विदितवान्; न वा नागरिको नष्टं द्रव्यं प्रतिलब्धवान्.

१९. निष्कुटः केदारः नारिकेळः तालश्च.

वृतिभिर्भित्तिभिर्वा कृतपरिरक्षं, प्ररोपितौषधि गृहपरिसरस्थलं निष्कुट इत्युच्यते; वृतिभित्तिशून्यं सीमासेतुपरिवेष्टितं नियतजलोपकृप्तिकं स्थलं केदारमिति. तत्र निष्कुटे शाकोपयोगिन्य ओषधिलताः फलदायिनो वृक्षाः पुष्पप्रदा वल्लयश्च संवर्ध्यन्ते. केदारे गोधूमादीनि शूकधान्यानि शालयश्च फलन्ति. अनियतजलोपपत्तिके बहिःस्थले माषमुख्यानि शमीधान्यानि नीलीकार्पासादिकं च प्ररोहन्ति. कूपात् सरसश्च निष्कुटे जलमानीयते. अवृष्टौ जलाशयान्नद्याश्च नीरं

कुल्योद्वारा केदारं गमयन्ति कृषिकाः. अविच्छेदेन कृषिकरणात् केदारस्य सारो हीयत इति कृत्वा तत्सम्पत्त्यर्थं तत्र गोमयादि दोहदं निवेशयन्ति.

एतद्देशप्ररोहिषु स्थावरेषु मुख्यो नालिकेरः. तस्याङ्गमङ्गं सप्रयोजनं दृश्यते. तस्य मूलभागेनावपनं पत्रैर्गृहपटलमावरणवृतिः पेटी च क्रियते; अपरिणतफलान्तर्गतं जलमुष्णसमयेषु पीतं स्वादुहितं भवति; परिणतं फलं खाद्यते. तैलयन्त्रनिष्पीडितात्च तस्मात् स्नेहोऽवतार्यते. नारिकेळतैलं यूरोपखण्डे दीपवर्त्तिनिर्मितौ बहुलमुपयुज्यते. फलत्वक्तृणैर्दाम महारज्जुश्च निर्मीयेते. आस्तरणमपि तया ऊयते; फलकपालं; पात्रस्थाने प्रतिनिधीयते; तेन चार्धितेने दर्वी निष्पाद्यते; प्रलवकाण्डाद्रसश्च्योतति; तञ्च सन्ताप्य मद्यमापादयन्ति; भुक्तेदञ्च केरद्रुमो नित्यमपेक्षते.

तालद्रुमस्य तु जलावसेचनं नावश्यकम्. स-

स्यान्तरप्ररोहणायोग्ये सिकतिले स्थले सोऽतिशयेन वर्धते. अस्योपयोगः केरवद् वेद्यः.

---

२०. उद्यमः.

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र दैवं प्रसीदति ॥ १ ॥

उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
हस्ते सुप्तप्रबुद्धस्य न ह्यायाति धनं स्वयम् ॥ २ ॥

यत् पूर्वजन्मविहितं कर्म तद्दैवमुच्यते ।
न तत् पुरुषकारेण विना सिध्यति जातुचित् ॥ ३ ॥

उद्योगिनः करालम्बं करोति कमलालया ।
तद्विघ्नस्य करालम्बं करोति कमलोद्भवा ॥ ४ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ५ ॥

सम्पदा सुस्थिरम्मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ ६ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं प्रमाणमिति कापुरुषा वदन्ति ।
दैवं विहाय कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ७ ॥

२१. सत्यम्.

अमेरिकाखण्डे संसृष्टदेशाभिधानस्य देशविशेषस्याधिपत्यमिदम्प्रथमं प्रतिष्ठापितवन्तं सुगृहीतनामानं (जार्ज) वाशिन्तननामानं महाशयं प्रति काचित् कथास्ति. स किल बाल्ये कदाचित् स्वलब्धेन स्वल्पेन पारितोषिकधनेन खड्गमेकं चिक्राय. तेन खड्गेन गर्वायमाणः पितुरुद्याने ततइत ओषधिवृक्षशाखानां लवनचापलं सलीलमाचरन् पित्रातिस्नेहात् संवर्ध्यमानामजानन् बालबदरीमेकां छित्वापातयत्. तत्पिता समयान्तरे तत्र सञ्चरन् बालबदर्यास्तां दशां ददर्श; क्रुद्धश्च कर्मकरानाहूय 'मत्प्रियतमेऽस्मिन् वृक्षे केनेदं साहसमाचरितम्' इति विभावनां कुर्वन् स्थितः.

तदा बालो वासिन्तन आत्मकृतं दौष्टयमबुध्यमानः खड्गपाणिस्तत्रागतः. दृष्ट्वा तं पितान्वयुङ्क—'अपि जानासि पुत्र! मम द्रव्यकोटेरभ्यधिकमिमं वृक्षं क एवमवस्थमकरोत्' इति. स बालस्तु निरशङ्कमूचिवान्—'तात! न जाने तस्मिन् वृक्षे तादृशं तव प्रेमाणम्. अहमेव तं वृक्षमच्छिनदम्' इति. ततः कीदृशमयमपराधिनि दण्डं प्रणेष्यतीति चिन्ताव्याकुलेषु परिजनेषु सद्यः प्रशान्तकोपः पिता 'वरमेवंविधान् शतं वृक्षान्नाशयन्मम पुत्रोऽस्तु, नतु मिथ्यावादी' इति जल्पन् पुत्रमुपसृत्य पृष्ठं परामृशन्नभिननन्द.

१. व्याकरि = मिश्रण, व्यतिकरित
२२. पृथिवी जलञ्च. = मिश्रित

भूमौ महदपां धाम महार्णव इति कीर्त्यते, अल्पस्तु जलस्य राशिर्जलाशय इति. महार्णवस्य न सर्वत्रैकरूपं गाम्भीर्यम्. यथा स्थलं शैलैराजिभिर्गर्तैश्च व्यतिकरितं बहुरूपं भवति, तथैव महार्णवः. अयं हि कचिदुच्चानः कचिन्निम्नः कचित्त्वगाधः.

अस्य जलमेकान्तलवणम्. यदि तत् तादृशं न भवेत्, शुक्तं पूतिगन्धि दुष्टं भूत्वाल्पेनानेहसा जीवराशिं निर्बर्हयेत्. यद्यपि महार्णवे जलं मनुष्या न पिबन्ति, तथाप्यात्मनीनं लवणं तत उत्पादयन्ति. लवणं खल्वाहारस्य रसनीयतां देहसौख्यं च जनयति. पानार्हपयसो नद्या जलाधारस्य कुल्यायाः सरसश्चाभावे जना भूमेरन्तर्यावदुत्सदर्शनं खननेन कूपं निष्पाद्य ततो जलमुद्धृत्योपयुञ्जते. पेयेन जलेन ताजा प्रत्यग्रनिर्मलेन भाव्यम्. पेयजलशुद्धिविषये परिगृहीतश्रद्धाश्चेद्वयम्, अद्धा बहूनां हिंस्ररोगाणां विषया न भवेम.

महासमुद्रेषु प्रवाळकीटा नाम यादोविशेषाः स्वदेहात् प्रादुर्भवतो विलक्षणान् पदार्थानल्पशः संगृह्याधस्तलात्प्रभृति चयनं कुर्वाणा नवान् गिरिसन्तानसन्निवेशानुत्पादयन्ति. आ च जलोपरितलादुत्थितेष्वेतेषु पर्वतेषु वीचीमालाभिघातात् ततः प्रच्युता मृदस्तरङ्गोपनीतास्तृणपर्णादिव्यतिकीर्णा मृदश्च स्थलतां प्रतिपद्यन्ते. एषु स्थलेषु पक्षिविष्ठाभिः सह बीजा-

नि पतन्ति. ततस्तृणेष्वोषधिषु वनस्पतिषु च प्ररूढ्य प्रवृद्धेषु तानि स्थलानि मनुष्यावासार्हा द्वीपा भवन्ति. एषु कतिपये तत्काले मनुष्यैरध्युष्यन्ते. मानुषानधिष्ठिताश्च द्वीपाः सन्ति.

---

२६. श्वा मार्जारश्च. (क)

चतुरो रक्षक श्वा रक्षिवर्ग स्वामिनो गृहं चौराणां दुर्जनानां वा प्रवेशाद्रक्षति. शुनो ज्ञानं विमर्शनशक्तिः स्वामिनि भक्तिः कृतज्ञता चेत्येते गुणाः सन्ति. स प्रियमित्रतुल्यो गणयितुं शक्यते. स पोषकस्य ध्वनिं दूरीनादिकाश्च चेष्टा वेत्ति. आघ्राणेन्द्रियेण तस्यासाधारणः प्रतिभा. तमाघ्राणान्मृगानुपलभमानं दृष्ट्वा मनुष्यान्वेषणेऽपि तस्य चोदना पुरातनैराचरिता बभूव. सर्वं कर्म तेन शिक्षयितुं शक्यते. यूरोपखण्डे कचिदुत्तुङ्गायां गिरिश्रेण्यां पथिषु सान्द्रपतितं हिमं शिलावद् घनीभवेत् तत्र पान्थेषु कदाचिच्छिन्नमेषु तानाघ्राणादुपलभ्य तदुपरि रुद्धं हिमं नखैरुत्खाय निरस्य तदाहितं भ

षणेनावेदयितुं समर्थौ काश्चित् कुक्कुरजातिं तत्रत्या
जनाः संवर्धयन्ति. अजान् मार्गप्रदर्शनाच्च त्रातुं
कौलेयकानां नियोजनं जाबालानां साम्प्रदायिकम्.
काश्चिदेव कृता अपरजातय ईदृशेषु कर्मसु कुशला भवन्ति.

स्काटलण्डदेशाभिजनः कश्चित् स्वीयं शुनकं
प्रत्येवं वर्णयामास—यथा 'मदीयः सारमेयो मम ब-
हूनुपकारान् कृतवान्. स मया दीयमानं नियोगं दु-
स्साधमपि नानोपायैः साधितवान्. गाढान्धकारे क्वचि-
न्निशीथे सप्तशतान्यजाडिम्भानामकाण्डे उपजातक्षोभा-
णि प्रदुत्य प्रत्यासन्नस्याद्रेः सानौ ततइतो व्यशीर्यन्त.
अहं मत्सहचरश्च यावच्छक्ति कृतप्रयत्नावपि नैव ता-
नि कश्चिन्नियन्तुमशकाव. "हन्त गतगताः सर्वेऽजपो-
ता" इति मम प्रलपितं श्रुत्वा मच्छुनको मन्ये सच
एव ततः प्रस्थित इति; अन्धतमसे तस्मिंस्तमन्तिके
स्थितमस्थितं वा नावामज्ञासिष्म. ततोऽन्वेषणवशा-
द्वानिशावसानमतिदूरमटित्वा कञ्चिदप्यजपोतमनुपल

भ्य निर्विद्यमानासुदिते सूर्ये गिरिप्रस्थात् प्रतिनिवृत्ता-
वभूव "यथावृत्तं स्वामिने निवेदयावः" इति.

२४. श्वा मार्जारश्च. (ख)

प्रत्यायान्तौ च कुत्राप्यद्रिद्रोण्यां सङ्घीभूतान-
जपोतांस्तस्या मुखे तिष्ठन्तं समन्ताद् दीयमानदृष्टिं
प्रतीक्षमाणमिव नौ दृश्यमानं तं श्वानञ्चाद्राक्ष्व. "भ्र-
ष्टेषु डिम्भेषु नूनमेते कतिपये सम्भूयधाविनः शुनाव-
रुद्धास्तिष्ठन्ति" इति मत्वा तानुपसृत्य गणितवद्भ्यामा-
बाभ्यामविकला सा ससशर्ती दृष्टा. "कथं पुनरयं श्वा
कात्स्न्र्येन विशीर्णान् मेषार्भकानस्मिन्नर्धरात्रे समूहित-
वान्, कथंवा प्रभातं यावद्रक्षितवान्" इति चिन्तय-
तोर्यत्सत्यमावयोर्विस्मयो जातः. अनेनैकेन शुना साधि-
तं कर्म न खलु शक्यमस्मत्पल्लीभवैरजार्जावैर्मिलितैरपि
सर्वैः कथञ्चिन्निर्वर्तयितुम्' इति.

मार्जारोऽस्माकं क्षुद्रोपद्रवावहान् मूषिकादीन्

जन्तून् हिनस्ति. अयमावासस्थले परिचिते रज्यति नतु जने. अपिचैष च्छद्मवान् क्रूरशीलश्च. अयमतिचिरं कारितसंस्तवोऽपि प्रियैराहारैराराध्यमानोऽपि गृहे सहसंवर्धिनो मनोरमान् शकुनीन् रन्ध्रेषु प्रहृत्य भक्षयेत्. न तावज्जाहिकेन जलमिष्यते. क्रुध्येच्चेदयं, शूत्कृत्य तीक्ष्णैर्नखरैर्गाढं विदारयेत्; यदि त्वेष तुष्येत्, नखान् संकोच्यान्तराकर्षेत्; तदानीं च तस्य पदानि राजपट्टवन्मृदुलानि दृश्येरन्. अस्य शुनश्च शाश्वतो विरोधो लोके प्रसिद्धः.

२५. गौः महिषी अजा च.

ग्राम्येषु पशुषु मानुषोपयोगी कश्चिज्जन्तुर्गौर्नाम. गोः क्षीराद्दधि तक्रं नवनीतं दुग्धघनश्च जायन्ते; गोचर्म मृदूकृतं तुरङ्गोपकरणायोपानदादये च कल्पते; विषाणेन च तक्षणसंस्कृतेन निर्मीयते पात्रं सम्पुटकः कङ्कृतं तसरुरन्यानि च नानोपकरणानि; खुरोऽभिपक्को वज्रलेपो भवति; अस्थीनि चेङ्गालितानि?

क्षेत्राणामुत्कृष्टो दोहदः. गौः स्वभावादहिंस्रा मनुष्यवश्या च. इयं हरिणादिवद्रोमन्थं वर्तयति. एषा हि यावदपेक्षं गृहीतं पलालादिकमभ्यवहारं प्रथममखण्डितमेव निगिरति. स च चतुर्षु तदीयेष्वाहाराशयेषु प्रथमाशयद्वारेण द्वितीयाशयं प्राप्य स्थितः कैश्चित् क्षणैः सरसतामुपयाति. पश्चादनया सुखासीनया तथाभूत अभ्यवहार आस्ये प्रत्यानीय यथावदवखण्ड्य निगीर्णः क्रमात् तृतीयं चतुर्थञ्चाहाराशयं गत्वा जीर्यति. गवा च समानप्रयोजना महिषी; तथापि गौरिव न चारुरूपा नच शान्तस्वभावा. महिषा हलं शकटं च कर्षन्ति. प्रायो लुलाया न दर्शनेन, न श्रवेणन, किन्त्वाघ्राणेनैवार्थं विदित्वा गच्छन्ति. अत एव ते धावनसमये नियमेन ऋजून्नमितनासिका दृश्यन्ते. विषाणं च माहिषं सारवत्तमम्. तत्र श्लक्ष्णीकरणं सम्यक् फलति.

२ मेंढा मेषः.

एडकः शान्तात्मा भीरुश्च. छगलस्त्वतिधीरः. निर्जनवनेषु खरास्थिलेषु गण्डशैलेषु भीषणेषु च गिरिशृङ्गेष्वपर्यस्तोच्चनीचस्खलितश्च प्लुतानि कुरुते. मेषलोमभिरुच्चावचाः क-

म्बळाः सन्तन्यन्ते. मेषलोममयाः कश्मिरिकम्बलाः गुणतोऽर्घतश्चोन्नता लोके गण्यन्ते. तुंभीक्षीरं गोक्षीरान्मेदस्वितरं दर्शनीयतरं च. पुष्टिदत्वाद् भेषजत्वाच्च तन्मन्दाग्नीनां पथ्यमभ्यवहार्यं भवति.

---

२६. ऋतवः.

उत्तरेऽहि भारते यूरोपे उदगमेरिकायां दक्षिणद्वीपेषु च प्रत्यब्दमृतवश्चत्वारः. ते च वसन्तो ग्रीष्मो हेमन्तः प्रावृडिति चोच्यन्ते. दक्षिणभारतस्य प्राग्भागेषु ऋतवः प्रावृट् शरद् हेमन्तः शिशिरो वसन्तो ग्रीष्म इति षट्. तत्राद्यः सिंहकन्ययोर्मासयोर्युगलमुच्यते, द्वितीयस्तुलावृश्चिकयोः, तृतीयो धनुर्मकरयोः, चतुर्थः कुम्भमीनयोः, पञ्चमो मेषवृषभयोः, षष्ठो मिथुनकुळीरयोः. एषु वसन्तो द्रामिळानां हृद्यः कालः. अत्र पक्षिणः सामोदं खेलन्तः कुलायनिर्माणमारभेरन्. वनस्पतयश्च किसलयिताः प्ररूढदलविताना: कोरकिता भूत्वा प्रफुल्लैः पुष्पैर्दिराजेरन्. क्रमेण पत्रेषु प्रसू-

नदलेषु च म्लायंम्लायं च्यवमानेषु फलकलिकाः प्रादुर्भूय शलाटूभूता ऊष्माभिघातात् क्रमेण परिणमन्तः फलतामृच्छन्ति. नखलु तपर्त्तौ पक्षिणो न गायन्ति; किन्तु वृक्षशाखादिषु निलीना एव तदा ध्वनिं कुर्वन्ति. अत्रैव कालेऽण्डानि विहगाः प्रसूय तेभ्यः शाबकान् प्रादुर्भाव्य पुष्णन्ति. आङ्गलेयानां सुखावहः समयो हेमन्तः. तदानीं पुष्पलताः समृद्धपुष्पा भवन्ति. शालिकणिशानि च पचेलिमैः सुवर्णसवर्णैः फलैराचितानि लवित्वा धान्यं साध्निन्वन्ति कृषिकाः.

वर्षासु तरुषु कुसुमानि न वर्तेरन्; तद्वदेव शाकुन्ताः. मृगाः खल्वपि भूतलक्लेदात् क्लिश्येरन्. भूमेर्दक्षिणोत्तरदेशेषु सरस्सु शीतवशाज्जलं शिलावद् घनीभवेत्. तत्र च बाला लोहमयं पादुकाविशेषं धृत्वा स्खलितप्रधावितं कुर्वन्तः क्रीडेयुः.

२७. कदली आम्रः जिल्विणी वटः कार्पासः.

कदली चाम्रश्च फलदेषु तरुषु प्रशस्तौ. कद-

ली एष्यांखण्डे आफिरिकाखण्डे अमेरिकाखण्डे च प्ररोहति. उत्तमे कदलीप्रसव एकास्मिन् शतद्वयाधिकानि फलानि स्युः. अमेरिकाखण्डे केषुचिज्जनपदेषु जना मोचाशलाटुभ्यः शोषितेभ्यः सक्तून् सम्पाद्य तैरपूपं श्राणां च राधयित्वोपयुञ्जते. मोचासमानः क्षिप्रफलो वृक्षो न विद्यते.

दक्षिणभारते चूतः स्तोकार्घतया कट्फलखदिरस्थाने प्रतिनिधीयते. चूतेन हि वलीकानि गोपानस्यः कवाटानि पेटिका अन्यानि चोपकरणानि निर्मीयन्ते.

चिञ्चातरुरत्यन्तं सारवान्; यन्त्रनिर्माणे बहुलमुपयुज्यते. तत्फलेन व्यञ्जनं रसश्च निष्पाद्यते. ईतिसमये दरिद्रा जनास्तत्फलानि बहुधा पक्त्वा भक्षयन्ति.

वटद्रुमः प्ररूढविततताभिः शाखाभिः, स्थूणोपमाभिः शाखाधारिणीभिः शिफाभिश्च द्रुमान्तराण्यातिशेते. केचिन्न्यग्रोधा अतिदूरप्रसृतेन शाखापरिणाहेन

बहुपरिवारस्य राज्ञो विश्रमणक्षमां विपुलां छायां वित-
रन्ति. अदृढावयवत्वाद्वटो गृहाङ्गदारुस्थाने नोपयुज्य-
ते. तस्य क्षीरेण दन्तवेदना निवर्त्त्यते, कुरेरीग्रहणा-
र्थो लेपश्च सम्पाद्यते. तस्य पत्राणि सन्धाय भोज-
नार्थं नीयन्ते.

कार्पासतूलतन्तुभिर्नानाप्रकाराणि वस्त्राणि क्रि-
यन्ते. सिकतिले कृष्णमृत्तिके च स्थले कार्पासस्य कृषिः
सम्यक् फलति. स च बल्लारि, कडप्पा, गोदावरि, मधु-
रा, तिरुनेल्वेलि, कोयम्पुत्तूर, सेलं, इत्येतेषु मण्डलेषु
भावितो बहुशः इङ्गलाण्डदेशं प्रति प्रेष्यते. अमेरिकाफ-
रिकाखण्डयोरप्ययं प्ररूढो भवति. कार्पासस्तम्बात् फ-
लोच्चयनसमय एव तूलस्तदावरणान्निष्कृष्योद्धेतव्यः.
अन्यथा आवरणं खण्डशश्छुटित्वा तूले संलग्नं ततो
विभक्तुं न पार्येत. अल्पेऽवकाशे पिचूनां मानं यथा
सम्पद्येत, तथा तान् यन्त्रेऽर्पयित्वा घनीकृत्य साधित-
तनुं तद्भारं महानावि समारोपयन्ति.

२८. देवदर्शिनौ.

द्वौ वैधेयौ देवं दिदृक्षमाणौ कञ्चिद् देवालयं गतौ. तत्रैको देवप्रतिकृतिमवलोक्य सहचरमाचचक्षे—'भ्रातः! शिला खल्वेषा दृश्यते. किमेनामीश्वर इति सर्वे व्यपदिशन्ति' इति. तद्वचनमाकर्ण्य पारिचारकाः श्रुत्वा देवोऽनेन 'शिले'ति निन्दित इति तं ताडयामासुः. ततो गते बहुतिथे काले स जातु तेन सहचरेण साकं कस्यचिद् मित्रस्य गृहे भुञ्जान आसाञ्चक्रे. तदा सहचरो जगाद—'धिगिदं भोजनम्; अत्र शिला ह्युपलभ्यत' इति. प्रागनुभूतप्रहारः स तथावादिनं सहचरं मुखे चपेटया सद्यो दृढं प्रहृत्य 'अरे मूढ! किं त्वमीश्वरं शिलेत्यधिक्षिपसि? एवमुक्तवता मया पुरानुभूतो दण्डः किं त्वया विस्मृतः? अत्र ईश्वरशाबकोऽस्तीति ब्रूहि' इत्युवाच.

---

२९. विद्यायामुद्योगः.

विद्यायाः सिद्धिमिच्छता निरन्तरमभ्यासः क-

र्तव्यः. तत्र कदाचिद् व्यग्रतामवलम्ब्य कदाचिदालस्यपरिग्रहेण कञ्चित्कालं विषयमेकमभ्यस्य तं विहाय कञ्चित्कालं विषयान्तरस्य परिशीलनेन च न किञ्चित् प्रयोजनं स्यात्. अतिमन्दोऽपि कश्चित् 'पिपीलिकासर्पणाच्छिलापि निम्नीभवेद्' इति लोकवादानुसारेण यदि प्रसन्नचित्तः प्रत्यहमल्पशोऽपि वा श्रद्धयाधीयीत, कथमपि स पण्डितो भवेदेव. यस्त्वात्मानं बुद्धिशालिनं मन्यमानः कदाचिदेवाधीते, नासौ सिद्धिं प्राप्नोति. अत्रोदाहरणं शशकूर्मीया काचन कथास्ति. कश्चित् कूर्मः केनापि शशेन साकं 'पश्यावस्तावत् सखे! इतः प्रदेशात् समं प्रचलितयोरावयोः कतरः प्रथममभीप्सितं स्थानं प्राप्य पुनरिमं प्रदेशं प्राप्नोति' इति ग्लहं परिपणितवान्. प्रस्थितयोस्तयोः पूर्वं शशकः सवेगं प्रधावितः पृष्ठतोऽतिदूरे शनैरागच्छन्तं कमठं वीक्ष्य 'क्षणमत्र विश्रमिष्यामि; कमठेऽभ्यर्णमागते पुनर्विद्रोष्यामि' इति विचिन्त्य मार्गतरुच्छायायां क्षणं विश्रान्तः. तथैव पथि धावनविश्रमौ पुनःपुनराचरन् कञ्चन वि-

श्रमपर्याये गाढं स सुप्तोऽभवत्. कच्छपस्त्वविच्छिन्नं च-
लच्चुद्दिष्टं स्थलं प्राप्य शशस्य प्रबोधात् प्राक् प्रस्थान-
देशं प्रत्यागतो बाजी ग्लहं निर्जिगाय. तस्माज्जयः सर्वदा
वेगवतामेवेति वा बलवतामेवेति वा न मन्तव्यम्.

३०. अन्धानां गजदर्शनम्.

अन्धाः कतिपये समेताः कचिदागत्योपविष्टाः.
तत्र केषाञ्चिद्विषादिना सह सम्भाषणं श्रुत्वा 'गजः,
कीदृग्' इति जिज्ञासमाना गजस्य स्वान्तिकानयनायाः
घोरणं प्रार्थयन्त. यथाप्रार्थनं च कृतवति हस्तिपके
उत्थितेषु च प्रज्ञाचक्षुष्वेकः कुम्भिनः प्रादमन्यः कर-
मपरः कर्ण परः पुच्छं च गृहीत्वा सम्यगाभिमुख्यः.
अथ ते गजो ज्ञात इति परितुष्टाः स्वीयं स्थानं पुन-
रागताः स्वं स्वं गजदर्शनं वर्णयितुमारेभिरे. तत्र पा-
दाभिमर्शी गजमुलूखलाकारमवदत्, करस्पर्शी मुसला-
कृतिं, कर्णग्राही शूर्पसन्निवेशं, पुच्छलग्नश्च मार्जनीम-
रूपम्. एवं ते स्वस्वविज्ञानमेव भङ्गिभेदैः स्थापयन्त

आप्तवाक्यान्यप्रमाणयन्तो विप्रलापेनैव कृत्स्नमायुरतिवाहयामासुः. एतेन—

मूर्खो विमृश्यवाच्येऽर्थे कापि पक्षे दुरास्थया ।
स्वपक्षवादनिर्बन्धं विजहाति न जातुचित् ॥

इतीयं नीतिः स्फुटा भवति.

---

३१. सर्वानुरोधोद्यमः.

एकः स्थविरः सपुत्रो ग्राम्यं कञ्चिदश्वकिशोरं विक्रेतुं पण्यवीथीं गमयन् प्रचलितः. तं वीक्ष्य पथिकः कोऽप्यभाषत—'बुद्धिरिक्तः स्वल्पव्ययं वृद्धः, योऽश्वं निर्भारं गमयन् बालं पुत्रं पादचारेण क्लेशयति' इति. श्रुततद्वाक्यः पिता तनयं वाजिपृष्ठे समारोप्य स्वयं तत्पार्श्वेलग्नश्चचाल. ततः स यावत् स्तोकमन्तरं न लङ्घितवान्, तावदपरस्य मार्गगामिनो 'रे बालक! दुर्बुद्धे! इयज्जराक्रान्ते वृद्धे पद्भ्यां सञ्चरमाणे कथं त्वमश्वारूढो यासि' इति पुत्रं प्रत्याक्रोशं श्रुत्वा पुत्रमवरोप्य स्वयमश्वमारुह्य किञ्चिद्दूरमतीयाय. ततोऽन्यः

समागम्य 'अहो साधु साधु, पश्यत, निष्करुण एष देशमी स्वयं हयस्य पृष्ठे सुखासीनो बालकं पद्भ्यां चारयति' इत्युच्चैर्जुघोष. वाचानया व्यथितमनाः पिता पुत्रमप्यश्वपृष्ठे समारोप्य चचार. ततः कतिपयपदगमनात् प्राक् चतुर्थः कश्चिदभिगम्य कथितवान्—'नराणामनुचितमेतन्नृशंसं कर्म, यदेकस्य बालस्याश्वस्य पृष्ठे बलिनौ द्वौ पुरुषावासाते. अनयोर्भरेण ह्यश्वस्य पृष्ठास्थि भज्येत. वरमाभ्यामश्वो यद्यह्येत. न त्वश्वेनानयोर्वहनं युक्तम्' इति. तत उपजातलज्जौ पितापुत्रावश्वादवतेरतुः; तस्य च पादान् रज्ज्वा संश्लिष्टबद्धान् कृत्वा तदन्तराले मुसलमेकं प्रवेश्य पुरः पश्चाच्च तदग्रे स्कन्धेनोहतुः. यावच्च तथा तौ कस्यापि संक्रमस्योपरि गच्छतः, तावत् सहस्ततालकलकले तदीयं वामकमवहसन्तः पुरोभागिनः केचित् संभूय तानुजगमुः. क्षुभितश्च तेनाश्वो मुहुरारब्धेन पादविधूननेन च्छिन्नचरणरज्जुर्मुसलात् प्रच्युत्य लोठंलोठं नद्यां भ्रष्टो निमज्ज. 'अहोबत लोकस्य भिन्नरुचितां विसृ-

य सर्वजनप्रीणनाय कृतैर्यत्नैर्मया नैकोऽपि जनः प्रीणितः, अथश्चैवं मदीयो नष्ट' इति प्रलपन् गृहं स स्थविरः प्रतिजगाम. लौटकर

साधारणव्यवहार

३२. सामान्यनीतिः.

शुभं वा यदिवा पापं द्वेष्यं वा यदिवा प्रियम् ।
अपृष्टस्तस्य तद् ब्रूयाद्यस्य नेच्छेत् पराभवम् ॥ १ ॥
मिथ्योपेतानि कर्माणि सिद्धिमन्त्यपि वर्जयेत् ।
सदुपायानि कर्माणि कुर्वीतासिद्धिमन्त्यपि ॥ २ ॥
यत्तावद् ग्रसितुं शक्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत् तदाद्यं भूतिमिच्छता ॥ ३ ॥
किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः ।
इति कर्माणि सञ्चिन्त्य कुर्याद्वा पुरुषो नवा ॥ ४ ॥
ऋजुः पश्यति यः सर्वं चक्षुषा प्रपिबन्निव ।
आसीनमपि तूष्णीकमनुरज्यन्ति तं जनाः ॥ ५ ॥
न वृद्धिर्बहुमन्तव्या या वृद्धिः क्षयमावहेत् ।
क्षयोऽपि बहुमन्तव्यो यः क्षयो वृद्धिमावहेत् ॥ ६ ॥

गाढं गुणवती विद्या न मुदे विनयं विना ।
महत्सु विनयोपेता मूर्खतापि मुदे भवेत् ॥ ७ ॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ ८ ॥
समाहृतगुणस्यापि साधुर्नाप्नोति तुल्यताम् ।
सच्छिद्रस्य मृणालस्य चापस्य कुटिलस्य च ॥ ९ ॥
ऐकगुण्यमनीहायामभावः कर्मणां फलम् ।
अथ द्वैगुण्यमीहायां फलं भवति वा न वा ॥ १० ॥
रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ ११ ॥
नियतैः पदैर्निषेव्यं स्खलितेऽनर्थावहं समाश्रयाति ।
सम्भवदन्यगतिः कः सङ्क्रमकाष्ठं दुरीशं च ॥ १२ ॥
आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ १३ ॥

विना गोरसं को रसो भोजनानां भुजङ्गप्रयात
विना गोरसं को रसो भूपतीनाम् ।
विना गोरसं को रसः कामिनीनां
विना गोरसं को रसः पण्डितानाम् ॥ १४ ॥

रसवाहिनीसमूह

३३. चक्षुः.

अस्माकं नयनं गवाक्षसममिति, तद्द्वारेणात्मा बाह्यं दृश्यजातं पश्यतीति चोक्तमधस्तात्. आकृतावल्पमपि चक्षुरतिमहान्ति द्रव्याणि गृह्णाति. यथा पटे मूर्तिराक्रियते, तथा पुरः स्थितः पदार्थो दृश्याख्ये सर्वान्तरे धवलसिराजाल आक्रियमाणः साक्षात्कृतो भवति. चक्षुराधारस्यास्थिगोलस्य रक्षायै धनुराकृतिर्भ्रूरुपरि सन्निवेशिता. भ्रूलोमानि क्रमप्रवणतया ललाटस्वेदजलं यथा दृष्टिं न प्रविशेत्, तथा नेत्रान्तोपान्ततस्तद् दूरीकुर्वन्ति. पक्ष्मणी च नयनस्य कवचतां प्रतिपद्योद्वेगजनकस्य प्रकाशस्यात्याक्रमणं परिहरती सुषुप्तौ रक्षितुमस्मास्वशक्तेषु जातेषु दृशं

रक्षतः अपिच ते दृशं प्रविष्टानि रजांस्येकत्रोपसमा-
धातुमान्तरजलेन चक्षुरुपर्यावरणं निस्संशोषमार्द्रयि-
तुं च पुनःपुनर्निमिषतः. यूरोपेऽमेरिकायां च स्पर्श-
वेदनविधयान्धैर्वाचयितुं यथा शक्येरन्, तथाक्षराण्यु-
त्थास्नूनि पत्रे सन्निवेश्य पुस्तकं सज्जीक्रियते.

परमकारुणिको भगवान् एकस्येन्द्रियस्योप-
घात इन्द्रियान्तरे पाटवातिशयमादधाति; अन्धानां
हि श्रोत्रेन्द्रियं त्वगिन्द्रियं चातिसूक्ष्मे; बधिरस्य तु च-
क्षुरिन्द्रियं तथा. एवं जनस्य तत्तदुपघातवैकल्येऽन्यान्य-
गुणपौष्कल्यं दृश्यते.

३४. निमित्तम्.

पाटलिपुत्राभिधाने कस्मिंश्चिन्नगरे राजा कश्चिदा-
सीत्. स जातु प्रातः प्रबुध्य जालमार्गेण मुखं प्रसा-
र्य बहिर्दत्तदृष्टिः कञ्चिदापणावपतितानां भक्ष्यशकला-
नामुच्चयने व्यग्रं शूद्रकुमारकमपश्यत्. पुनर्जालाद्
मुखं प्रतिसंहरतस्तस्य जालद्वारोपरिदारुणैः संघट्टनेन

व्रणितात् मूर्ध्नो रक्तं बहु जगाल. ततः क्रुद्धो राजा 'अद्य प्रातरस्य दुर्भगस्य मुखे प्रथमदृष्टिपातादेव रक्तदर्शनरूपामिदममङ्गलं मे जातम्. एवमन्येषामप्यनर्थो जायेत. अतः शूद्रकुमारकस्यास्य शिरश्छिद्यताम्' इत्यादिदेश. ततो वधाधिकृतैः 'त्वन्मुखदर्शनाद्राज्ञः शिरसि क्षते जातमिति त्वच्छीर्षच्छेदादेशस्तेन विहितः. तस्मादेहि वध्यस्थानम्' इति तं कुमारमाचकृषुः. स तान् प्रार्थयत—'प्रसीदन्तु भवन्तो वधात् प्राङ् मां राजान्तिकं प्रापयितुम्; वाक्यमेकं तस्याग्रे वक्तव्यमस्ति' इति. तथेति तैर्नृपाग्रे नीतश्च स तमन्वयुङ्क—'महाराज! प्रातर्मन्मुखदर्शनेन देवस्य देहात् किञ्चिद्रक्तमात्रमपेतम्. मम तु देवमुखदर्शनेन शीर्षच्छेदान्ता खलु विपदुपनता. तत्र न्याय्यं कतमं देवो निर्णयमुत्पश्यति' इति. तच्छ्रुत्वा व्रीडितो राजा तं विसर्जयितुमाज्ञप्तवान्.

सुप्तोत्थितस्य प्रथमं काकयुग्मावलोकनं तस्मिन् दिने शुभावहमिति केनापि निमित्तवेदिना

कश्चिदुपादिष्टः स्वस्य किङ्करं 'प्रातर्द्वौ वायसौ सहावस्थितावुपलभ्य सद्यो मां प्रबोधय' इत्यादिश्य रात्रौ सुष्वाप. ततः प्रभाते किङ्करस्तथाभूतौ बलिभुजौ पश्यंस्त्वरिततरं स्वामिनं प्रबोधयामास. किन्त्वागतस्य स्वामिनो दृष्टिपातात् प्रागेव तयोरन्यतर उड्डीय गतः. स्वामिना तु 'रे मूढ! अन्यतरोड्डयनात् पूर्वमेव मां किमिति नाहूतवानसि' इति साधिक्षेपं ताड्यमानो भृत्योऽब्रवीत्—'मिलितं काकद्वयं दृष्टवता मया तावदिदमिदानीं फलमनुभूतम. नखलु जाने स्वामी चेत् तदद्रक्ष्यत्, कीदृशं फलमन्वभविष्यत' इति. अथ भर्ता प्रत्युत्तरमप्रतिपद्यमानस्तूष्णीं गृहाभ्यन्तरं विवेश.

३५. क्षमा. (क)

राधिका नाम कापि योषिदतिशैशवे मातापितृवियोगं प्राप्ता पितृष्वसुर्मालावत्या गृहे समवर्धत. अतिबालिकायास्तस्याः पोषणमुपक्रमे मालावत्याः कृच्छ्र-

साध्यमासीत्. किन्तु राधिका विसोढसर्वकृच्छ्रा पितृष्वसारमनतिवर्तमाना तत्प्रियाण्याचचार. सा निसर्गाद् बालिकासाधारणं चापलं विहायोषजातविद्याभ्यासतर्षा बालानामधीतृविषयकस्य संभाषणस्य श्रवण आत्मनोऽध्ययनप्रतिबन्धिकां नियतिं ध्यायंध्यायं दूयेत. तथापि वृथाकालक्षेपमसहमाना औपवेशिकस्य कृषीवलस्य गृहपरिसरप्रदेशे शिलाशकलोच्चयने तदीयानामजानां कालेनायामन्येषां तन्निदेशानामनुष्ठाने च सा यथाकालं व्याप्रियेत. निर्वृत्ते च व्यापारे गृहमासाद्य गृहसम्मार्जन-पात्रशोधन-अन्नपाकादिकेषु गृहकर्मसु मालावत्याः सहकृत्वरी स्यात्.

एवं गच्छति काले दिवाकृतकर्मणो बालानां दिनान्तेऽध्ययनानुकूलः कश्चित् धर्मपाठालयस्तद्ग्रामे भाग्यवशादुपकल्पितो जातः. तत्रात्मनः प्रवेशनं राधिका पितृष्वसारमयाचत. स्वसंवर्धितायास्तस्याः कृतकपुत्र्या यत्किमपि श्रेयो विधातुं चिरेणावसरं प्रतीक्षमाणा च सा तामभिनन्द्य प्रीतिपूर्वं पाठालये प्रवे-

शयामास. प्रविष्टायाश्च तस्याः श्रद्धोपस्कृतबुद्धेरुत्तारे नातिदीर्घः कालोऽपेक्षितोऽभवत्. सा हि पुस्तकक्रय-मांगूडे णाशक्ता याचितकं पुस्तकमुपाध्यायाल्लब्ध्वा क्षणेक्षणे पठन्ती कञ्चित् कालमवर्तत. ततः क्रमेण लिपिलेख-नपाटवे जञ्जन्यमाने स्वहस्तेन पाठान् विलिख्याधी-समय यानाः स्वल्पेनानेहसा पुस्तकानां धारावाचनायां हस्ता-स्था क्षराणां सम्यङ् न्यसने च प्रवीणा बभूव.

३६. क्षमा. (ख)

एवं वर्तमानाया राधिकायाः प्राप्ते द्वादशे व-आयुः यसि काचिद्विपत्तिरुपननाम. सा हि कचिद्दिने नद्या सत्वर जलमादायागच्छन्ती पथि पश्चात् शकटस्य सरभसो-लोट्ट पसरणध्वनिं श्रुत्वा विवृत्य दत्तदृष्टिः शकटे युक्तौ वित्रासजनितक्षोभतया जवेन मार्गाद् बहिः स्वपन्तं कञ्चित् बालकमभिद्रवन्तौ महोक्षौ पश्यन्ती झटिति जलकुम्भमवतार्य बालं ग्रहीतुं वेगाद्ययौ. अत्र चा-न्तरे गोभ्यां शृङ्गेणाभिहत्य पातितायास्तस्याः पादौ

शकटमाक्रम्य व्यारुरोज. दृष्ट्वा च तं व्यतिकरं सम्भ्रान्ता मार्गचारिणः सहसोपसृत्य तामुदध्नुः; परन्त्विति-कर्तव्यतां ते नावेदिषुः. ततः कोऽपि भिषगागत्य तस्याः पादौ परीक्ष्य पादमेकं भग्नमवदत्, अन्यं तु बलवत् क्षतम्. तेन व्याधिना चिरं पीडिता राधिका क्रमेणोपशान्तायां वेदनायां विरोपिते च व्रण आत्मनोऽपरिहार्यया पङ्गुतयोपनतां पितृष्वसुरन्यस्य वा जनस्य शुश्रूषणे शक्तिहानिं भूयमनुशुशोच. तथापि सा पङ्गुताव्याजेन शुश्रूषाकर्म न सर्वथा त्यक्तवती.

उपचिकीर्षवो हि स्वभावादावृते द्वार एकस्मिन्नुपकारस्य द्वारान्तरमवश्यमुपलभन्ते. सा खलु सीवनशिल्पं, बाललालनां, रोगिवृद्धादिभिः सहावस्थानं, ह्यपुस्तकवाचनया तेषां विनोदनं, अन्यच्चैवम्प्रायं व्यापारं प्रतिदिनमनुतिष्ठन्ती देहयात्रापेक्षितं धनमपि किञ्चित् तेन लभमाना स्थिता. ततोऽल्पेन कालेन तस्या अवदाते चरिते ततइतो जनैरभिनन्द्यमानेऽभ्यर्णग्रामाभिजनः कृषीवलः स्वपुत्रेण तामुद्वाहयांबभूव.

भर्त्रा च साकं गृहसौख्यानि सा निर्विशन्ती जरां पितृष्वसारमविस्मृततत्कृतोपकारा यावज्जीवमन्नवस्त्रा-दिदानेन ररक्ष.

---

३७. मातृभक्तिः.

पुरा यूरोपखण्डे प्रकृत्या व्यतिक्रमासहनः कश्चिद्राजा बभूव. स आत्महूतिप्रतीक्षणार्थं कञ्चिद् भृत्यं स्ववासगृहसंश्लिष्टे कोष्ठे 'सततमप्रमत्तः सन्नि-धेहि' इति नियुक्तवान्. क्वचिद् दिने स तं बहुकृत्व आह्वयन्नपि तस्य प्रतिहृतिमशृण्वंस्तत्र कारणं जिज्ञा-सुर्बहिर्निर्गत्य परिश्रान्तसुप्तं च तमुपलभ्य प्रबोधयितुं तदन्तिकमुपससार. तदानीं तत्कोष्ठैकदेशे अग्रमात्र-दृश्यं कमपि लेखं पश्यन् कौतुकात् तल्लेखार्थमवग-न्तुमिच्छुस्तं कोशादाकृष्यावाचयत्. लेखस्तु तस्य जनन्या प्राहितः. तत्र च, स्ववेतनात् कृच्छ्रेण शेषि-तस्य द्रव्यांशस्यात्मने प्रेषणं, अपाटवदशायां प्रीति-पूर्वमात्मनो रक्षणं च पुत्रेण क्रियमाणं प्रत्यभिनन्दन-वाक्यमुपन्यस्य मात्रा प्रयुक्तं 'पुत्रक! ईशस्त्वामनु-

गृह्णातु' इत्याशीर्वचनं लिखितमासीत्. ततो राजा निभृतं स्ववासगृहं प्रत्यागत्य रूप्यप्रतिनिधिपत्राणि कानिचिदादाय पुनरुपसृत्य तेन लेखेन साकं भृत्यस्य कञ्चुकपेश्यां निवेश्य स्वं स्थानं पुनः प्रतिपन्नस्तमुच्चैः-कारमाजुहाव. भृत्यश्च झटिति प्रबुध्य सम्भ्रमात् प्रभोरान्तिकं प्रधावित उपासरत्. 'न खलु त्वं गाढं सुप्तोऽभवः' इति सतर्जनं राज्ञो वचनं श्रुत्वा भीतस्य ततश्चितः स्खलत्तस्य पाणिर्यदृच्छया कञ्चुकपेश्यां विवेश. अपूर्वमिव पत्रजातं तदन्तर्वर्तमानं स्पर्शेन शङ्कमानस्तदाकृष्य विलोकयन्ननात्मीयं रूप्यप्रतिनिधिपत्रजातं विज्ञाय सन्त्रस्तः सगद्गदं रोदितुमारेभे. तं राजा 'अरे किं त्वमुन्मत्तोऽसि? किमित्यकाण्डे रोदिषि' इत्यपृच्छत्. किङ्करस्तस्य पादयोः पतित्वा 'देव! नूनं यः कोऽपि मामनर्थेन योजयितुं समीहते. न खल्वहमवगच्छामि रूप्यप्रतिनिधिपत्रवृन्दमेतत् केन मत्कञ्चुकपेश्यां निवेशितम्' इति परिदेवितवान्. राजा तु तं स्मित्वोवाच—'भद्र! मा तावद् भैषीः;

निद्रासमयेष्वीश्वरेणास्माकमनुग्रहः क्रियमाणो लोके दृश्यते; सोऽयमनेन प्रकारेण त्वयि मन्ये सम्पन्नः; तदेतद् द्रव्यं माञ्चै त्वमुपहर; "तां त्वां च नाहं जातुचिदुपेक्षेय" इति मत्प्रतिश्रवं च त्वज्जनर्नी ग्राहय' इति.

—०:०:०— ×आनन्द

३८. हिंसारसः.

कतिपये बालक बालकाः क्रीडाकौतुकिनः सरस्तीरे संभूय शिलाशकलानि जलोपरि मण्डूकवत् सारयन्तः स्थिताः. तत्रस्था भेकाः शिलाशकलेभ्यस्त्राणमिच्छवस्ततइतो निमज्ज्य निलेतुमारभन्त. किन्तु कइबार शिलाखण्डेष्वसकृत् सन्तत्या पतत्सु भेकेषु ददुराः केचिद् मृताः केचिच्च क्षताङ्गा जाताः. तेषु धीरः कश्चिज्जलोपरि प्रसारितशिराः 'प्रियाः! बालकाः! किमिति यूयमियति बाल्ये नृशंसं कर्म परिशीलयथ. एषा हि शिलाशकलस्य प्रेरणक्रीडा यद्यपि युष्माकमानन्दहेतुः;

तथापि नोऽत्याहितं खलूत्पादयति. अन्याय्यः खल्वयं व आचार' इत्युवाच. तस्मात् क्रीडापि पराहिंसयैव कार्या.

---

३९. अकृतश्रोऽधमर्णः.

कोऽपि धनी द्वित्रवर्षेभ्यः पूर्वं गृहीतस्य ऋणस्य प्रत्यर्पणमधमर्णमयाचत. ऋणग्रहणमपलपत्यधमर्णे मिथस्तौ कलहायमानौ सनीडग्रामस्थायां न्यायसभायामभियोगं कर्तुं प्रस्थितौ. मध्येमार्गमधमर्णः प्रियवचनैरपरमुपप्रलोभ्य सप्रश्रयं 'भोः स्वामिन्! क्व तद्ऋणप्रमाणलेख्यं? प्रसीद मे ऋणग्रहणकालं जिज्ञासमानाय तद्दर्शयितुम्' इति प्रार्थितवान्. उत्तमर्णेन साधुना 'तदिदमस्ती'ति परिधानान्तरालादुद्धृत्य प्रतिपादितं तल्लेख्यं वाचनमिषेण निध्यायन् लवशश्छित्वाभ्यर्णकूपे चिक्षेप. सद्यस्तमुत्तमर्णः परिधाने गृहीत्वाकर्षन् प्राड्विवाकमुपगम्य वृत्तमशेषं निवेदयामास. किं त्वं लेख्यमच्छिदः' इति प्राड्विवाकेन पृष्टः

सोऽभाषत—'नाहमस्माद्दणमग्रहीषं, न वा प्रमाण-लेख्यमच्छैत्सम्' इति. न्यायाधिपतिर्धनिकं 'गच्छ, आनय लेख्यस्य शकलानि, यदि तस्यान्धौरुपकण्ठे कीर्णान्युपलभ्येरन्' इत्युक्त्वा विससर्ज; प्रकृतस्मृति-विच्छेदनाय चाधमर्णेन साकं हृदयग्राहीणि तानितानि लोकवृत्तानि कांश्चिन्मुहूर्त्तान् प्रस्तुवानस्तमाकारैर्वि-स्मृतात्मानमवधार्य पप्रच्छ—'अपि नामेयता सम-येन स धनिकस्तं प्रदेशमुपगतो भवेद्? इति. 'स्वा-मिन्! नखलूपगतो भवेत्; अतिदूरो ह्यसौ प्रदेशः' इति झगित्युत्तरमृणी ववाम. व्यवहारनिर्णेता तु 'एवं खलु मूर्ख! सत्यमुद्गीर्णवानसि' इत्युक्त्वा तं दण्ड-यित्वा च ऋणमखिलमुत्तमर्णाय प्रत्यर्पयामास.

ऋणस्य ग्रहणमेव तावदनुचितम्. यदाहुः—

'लोकद्वयप्रतिभयैकनिदानमेतद्
धिक् प्राणिनामृणमहो परिणामघोरम्।
एकः स एव हि पुमान् परमस्ति लोके
क्रुद्धस्य येन धनिकस्य मुखं न दृष्टम्'॥इति

गृहीते तस्मिन्नुत्तमर्णातिसन्धाने प्रयतनमनार्यमस्वर्ग्यं च. पूर्वं बङ्गदेशभर्तृपदे स्थितः मार्क्विस-वेल्लसलिनामा ऋणनिर्यातनविषये प्रख्यात उत्तमः पुमानासीत्. स हि स्वपितुः ऋणार्णवमग्नस्य प्रमीतस्य ऋणं तदपाकरणे धर्मशास्त्रेणाप्रतिबद्धोऽपि कृच्छ्रेण निरवशेषं विशोधयामास.

४०. कुटुम्बैकपत्यम्.

कस्यचित् स्थविरस्य चत्वारस्तनया आसन्. ते पितुर्हितोपदेशान् प्रत्यादृत्य नित्यं मिथः कलहायमाना अवर्तन्त. कचन दिने तानानाय्य प्रतनुकाष्ठानां पूलमेकं संहतबद्धमग्रे निवेश्य 'इदं भङ्क्ष्वि' इति ज्येष्ठमादिदेश. स तु तद् भङ्क्तुं कथमपि नाशक्नोत्. एवमन्यैरपि प्रत्येकमादिष्टैस्तद् भङ्क्तुं नापारि. ततः पित्रा 'संभूयापि वा तद्भञ्जनं कुरुध्वम्' इति चोदितास्ते समस्ता अपि कर्तुं न शेकुः. ततस्तेन बन्धं विस्रंस्य 'एकैकेनैकशः काष्ठानि भज्यन्ताम्'

इत्युक्त्वा हेलयैव ते तानि सर्वाण्यभाङ्क्षुः. तदा पिता तानवदत्—'पुत्रकाः! इदं तावद्युष्माभिरवधार्यतां—यत् कृशान्येतानि काष्ठानि सङ्घातदशायां भङ्क्तुमशक्यानि दृष्टानि, विश्लिष्टमात्राणि तु सुखतरभञ्जनीयानि जातानि. एवमेव मिथः संभिन्नानां युष्माकं महद् बलं भवेत्, येन परेषामधृष्या भवेत. अमर्षवशा मिथो भिन्नास्तु यूयं सद्यः शत्रोरासिषीभूता नश्येत' इति. अनया पितृप्रदर्शितया निदर्शनया परमां मतिमुपगताः परस्परविरोधपरिहारेण ते सौख्यात्रमविन्दन्त. एकोदरजातानामन्योन्यविरोधो मानहानये केवलं कल्पते.

४१. मातापितृवाक्यलङ्घनम्.

स्थापित भोजनस्य गृहे निक्षिप्तभक्ष्यस्य कड्यगह्वरस्य सविधे कचिल्लतावलये अमर्षवश कापि मूषिकोवास. तस्या डिम्भः प्रतिनिशं ततइतः सोल्लासं विहरणसुखमनुभवन् कचिद्दिने बहिर्विहृत्य प्रहृष्टमना मातृसविधं प्रत्यायातः

'मातः! मिथ्या ह्येतत्, यत् केचिदाहुः—मानुषा अस्मभ्यं द्रुह्यन्तीति. न खलु श्रुतमात्रे सर्वस्मिन्नर्थे विश्वासः कार्यः. एतद्गृहवासिनो हि नरा महता प्रयासेनास्मदर्थे किमपि गृहं निर्मितवन्तः. तत् समन्ताद् भित्तिभिरावृतं विपुलं दृश्यते. तत् प्रविष्टानस्मान् सपरिवारा बहवोऽपि पृषदंशकाः सञ्चलन्तो ग्रहीतुं न शक्नुयुः. अपिच तत्रास्माकं प्रवेशनिर्गमयोरनुगुणं द्वारमस्ति. खरस्पर्शेषु लतावलयेषु प्रविशतां नः सुलभः पार्श्वसंघर्षः; इह तु न तादृशं दुःखं भवेत्. किञ्च नवानोदकेदराणि हृदयग्राहीणि भक्ष्याणि चान्तर्वसन्ते' इत्युक्त्वा 'अम्ब! यद्यनुमन्यसे तस्माद् भक्ष्यात् कमप्यंशं तवाहरिष्यामि' इत्युवाच.

माता तत्त्वाभिज्ञा पुत्रमाह स्म—'वत्स! श्रूयते यद्वचनं; तद् भित्तिगर्भगृहमस्मद्ग्रहणाय कल्पितं किमपि साधनमत्रेहि; अस्मान् प्रलोभ्य मारयितुं तत्र भक्ष्यं निवेशितम्; सति सौकर्येऽस्मज्जातिमेषां नरा नाशयेयुः. न खलु जाने, तथाविधं गृहं

प्रविष्ट एकोऽप्युन्दरुर्जीवन् प्रत्यायात इति; तज्जागृहि प्रिय! पुत्रक! मास्म तदन्तिकं गमः' इति. तत् श्रुत्वा स शाबको 'नयनपाटवाभावाद् गृहे तत्राश्वासं न करोति जरती मे माता. तत्र लेशतोऽपि विप्रलम्भशङ्काया नावकाश' इत्युपजातनिश्चयः 'अहं तद्गृहं प्रविश्य भक्ष्यस्य प्रासमेकं संदश्य जनन्या उपहरिष्याम्येव; सा च भक्षयिष्यत्येव' इति विचिन्त्य सुप्रशान्ते वेश्मनि निभृतं तद्गृहं प्रविश्य लालसया भक्ष्यं दंष्टुमारेभे. ततस्तदुत्पन्नं किलकिलारवं श्रुत्वा भीतो झगिति स प्रवेशमार्गेण निर्गन्तुमधावत; छादिते च तस्मिन् मार्गेऽन्तर्बहिरप्यसम्प्राप्तोऽपि निर्गमद्वारं नोपलब्धवान्. प्रातस्तद्गृहकपाट उद्घाट्यमाने बहिर्धावने प्रवृत्तमात्रं तं गृहपालकाः श्वानो गृहीत्वा सन्दश्य लवशः खण्डयामासुः.

४२. व्यायामः.

भारतखण्डे दरिद्रा जना अतिमात्रमायासं कुर्वन्ति. धनिनस्त्वावश्यकमप्यायासं न कुर्वन्ति. अ-

अनुरोध

न्तरीपका: प्रतिदिनमारोग्यार्थं पद्भ्यां वा अश्वमारुह्य वा ततइतो नियमेन परिक्रामन्ति. भारताभिजनो धनिकः पुनर्नियमेन गृह एव तिष्ठति, न च गृहान्निस्सरति कार्यान्तरनिर्बन्धाभावे. तदेतदयुक्तमहितं च. पुंसा नामोचितव्यायामशालिना भाव्यम्. महत् खल्लु प्रयोजनं व्यायामेन सिध्यति. अस्मद्देहे हि चलनहेतुभूता मांसप्रचुरा भागा वल्गसा नाम मांसपेश्यः सन्ति. ता यथोचितमुपयुज्यमानाः प्रवृद्धा बलवत्यश्च स्युः, अन्यथा कृशा दुर्बलाश्च. पसीना आने से

अस्माकं निर्व्यापारस्थितावनुकूल प्रायः षोडशकृत्वो निश्वसिमः. धावनसमये तु तूतस्त्वरिततरं निश्वसिमः, अधिकतरं च नवं वायुमन्तरङ्गीकुर्मः. तद्वशाच्च रक्तं सम्यग्विशुद्धं भवति. हृदयस्यापि तदानीं त्वरिततरव्यापारितया सर्वेषु देहभागेषु रक्तमधिकतरं प्रसरति. २ अन्दर ले जाते हैं

अयमपरो गुणो व्यायामे, यद्वयं शीघ्रसञ्चारे बलवत्कर्मानुष्ठाने वा स्विद्यद्देहा भवामः. स्वेदसलिल

ह्येतद्देहान्तर्भागाद् त्वग्द्वारेण दृष्टांशान् निस्सारयत् तमारोग्यसम्पन्नं करोति. किञ्च व्यायामवानधिकमभ्यवहारं ग्रहीतुं शक्नोति. गृहीतश्च स सुखं जीर्यति.

उचितव्यायामशालिनो जना बलसमृद्धसर्वांवयवा भवन्ति. व्यायामहीनास्तु अलसभावमापन्ना निरुद्योगा भूत्वात्मनः परेषां वा नोपकारमाधातुं प्रभवन्ति. ×एकचित्त १क्रमकरना चाहिये

बालाः स्वभावात् क्रीडाकौतुकिनो भवन्ति. सा तेषामनुकूला. धावनकन्दुकप्रेरणादिरूपा हि क्रीडा तेषां पादयोर्बाह्वोश्च बलमावहति. किं बहुना; कलकलेनापि हसितेनापि तेषामारोग्यं वर्धते, यतस्ताभ्यां तत्तदवयवा व्यापारिता भवन्ति.

किन्तु व्यायामो हित इत्येतावता न बालैः × पाठमुपेक्ष्य क्रीडैकतानैर्भवितव्यम्, न वा पाठपरिपन्थिनी क्रीडेति कृत्वा व्यायामोऽत्यन्तमनयितव्यः. यत् पुनः प्रायः केषुचित् पाठालयेषु बाला आनेय-१

भेदपरिग्रह विनैकत्र चिरमवरुध्यन्ते, तदसाम्प्रतम्.

सकलकलाशालासंबन्धिन्याः परीक्षायाः कृते बलवत् परिश्राम्यन्तो व्यायामाभावात् पीडामनुभवन्ति बालाः. तेषु केचिदध्ययन एव केवले कृत्स्नः कालः पर्युपयोक्तव्य इति मन्यन्ते. तथाकरणे महाननर्थो जायेत. अवसरेषु कोरुणा स्वापकरणमिव जनेन बुद्धिरुत्तेजनीया. सा हि मस्तिष्कव्यापारेण व्याप्रियते. मस्तिष्कं च व्यायामेन संविहितप्राज्यरक्तसम्भारमृजस्वलं च भवति. ये पुनरध्ययनातिगर्धेन व्यायामसुपेक्षन्ते, ते तथा रोगवन्तो भवन्ति, यथाभीप्सितपरीक्षाप्रवेशे शक्तिहीनाः स्युः. एवं तावत् केचित् स्वयं रोगमुत्पाद्य यावज्जीवं तेन पीड्यन्ते.

दिनान्ते गुलिकया कन्दुकेन वा क्रीडनं हितहेतुर्भवति. बालिकानां नर्तनप्रत्यादिकं प्रशस्तम्.

स चायं सर्वजनीनोऽपि क्षुत्समये पूर्णाभ्यवहारग्रहणोत्तरकाले वा न कार्यः.

४३. अभिमानी विकत्थनः कुमारः.

कश्चिद् महावणिक् वाणिज्ये विनष्टसर्वद्रव्यः क्वचिद् ग्रामं कञ्चित् प्राप्य भार्याधनेन स्वल्पेन कृच्छ्रात् कालयापनं कुर्वन्नासाञ्चक्रे. तदा तस्मै सुहृत् कश्चिद् वणिक् 'तव प्रशान्ते ऋणापकरणव्यतिकरे,? त्वां मदीये वाणिज्येंऽशिनं कल्पयिष्यामि' इति प्रतिश्रुतवानासीत्. तस्य कुमारेण नगरे भूरिवित्तव्ययोपास्ये प्रशस्ते पाठालये पठता तत्रत्यैः सबहुमानमुपलाल्यमानेन पितृर्दुर्गतिवशादध्ययनमपहाय पितृपार्श्वं गन्तव्यमभवत्. गच्छंश्च स मार्गसङ्गतानां केषाञ्चिदग्रे स्वपितुर्भाग्यभंशस्य प्रकाशने लज्जितः 'पितुरन्तिके नानाभोगाननुभवितुं गच्छामि' इति विकत्थते स्म. तत्पितुरुत्तमर्णसम्बान्धिनस्ते तस्य तथाविधां वाचं निशम्य 'तत्पिता नूनमस्मान् वञ्चितवान्' इति मन्यमानास्तत्कदर्थनायां मतिं चक्रुः; वाणिज्यांशदानप्रतिज्ञातं तत्सुहृदे च पुत्रविकत्थनां निवेदयामासुः. तदिदं सर्वं वृत्तं दैवाद्विज्ञाय तत्पिता भूतार्थं सुहृदे निवेदयितुं

शकटं भाटकेन ग्रहीतुमपारयन् दूरं तद्भवनं पादचारेण प्रस्थितः पथि च श्रमवशादुपजातरोगः कान्यप्यहानि विलम्ब्य चिकित्सितैः किञ्चिदिव शान्ते रोगे धनिकमुपगम्य स्वपुत्रचापलं निवेदयामास. किन्तु 'त्वदर्थे कल्पितोंऽशः प्रागेवान्यस्मै दत्त' इति धनिकेन कथितो गत्यन्तराभावात् कामपि हीनामेव वृत्तिं स अश्रितवान्. पश्यत पुत्रस्य दम्भदोषेण पितुः कीदृगयमनर्थ आपतितः.

४४. तस्करसत्यशीलौ.

शङ्कर इति शम्बर इति च द्वौ बालावास्ताम्. तत्र शङ्करोऽन्यात्मीयं वस्तु कदाचिदपि नैव हरेत्; अतः स सत्यशीलः संवृत्तः. अपरः पुनरसकृदस्वीयमर्थं हरेत्; अतः स चौरो जातः. शङ्करः किलातिबाल्ये चापलात् परकीयस्य पदार्थस्य ग्रहणे प्रवर्तमान एव मातापितृभ्यां दण्डयित्वा प्रतिषिद्धः 'सत्यशीलो वर्तस्व' इति वारंवारमुपादिष्टश्च. शम्बरस्तु

परस्वं गृह्णन्नपि पितृभ्यां न निवारितः; तस्मादेषः स्तेनाग्रणीः समपद्यत.

कचिद् दिने प्रातः शङ्करः पाठालयं गच्छन् पथि पृथुं मञ्जूषां पृष्ठे वहन्तं कमपि नयत्ता केनापि पथिकेन समागच्छत. पथिको मार्गपार्श्ववर्तिनः पान्थविश्रामगृहस्य द्वारि स्थितस्तत्रागतं तद्भूस्वामिनमुक्तवान्—'आर्य! प्रसीदतु भवान् मां तावच्चिन्तयितुम्, यावदहमत्रायतने पाथेयमभ्यवहृत्यागच्छामि. देहि कमपि मे सहायम्, योऽनवरोपितभारमश्वमिमं वल्गायां गृह्णन् मत्प्रत्यागमनावधि घासदानेनानुग्रहीष्यति' इति. भूस्वामी च समीपे परिजनासन्निधानादन्तिके गच्छन्तं शङ्करमाहूयाश्वावलम्बनाय प्रार्थितवान्. पान्थः 'अपि भवान् प्रतिभूर्भवेदस्य बालस्य सत्यशीलतायाम्? मदीयेषु किमर्थं मञ्जूषान्तर्गतेषु नारङ्गफलेषु चापलं नाचरेत्? प्रकृत्या चपलाः खलु बालकाः' इति तमन्वयुङ्क. क्षेत्रस्वामिना 'जानामि शैशवात् प्रभृत्येनम्. नखल्वसत्यं

चौर्यं वास्य क्वचिदपि कर्मणि दृष्टपूर्वम्. अपिचैनमादेक्ष्यामि त्वदीयानि फलानि त्वन्निर्विशेषं पालयितुम्' इति भणिते, जातप्रत्ययः पान्थः 'तात! यद्यप्रमत्तः फलानि रक्षेः, तर्हि श्रेष्ठं फलमेकं ते पारितोषिकं दद्याम्' इति वदन् 'तथा' इत्युक्तवतो बालस्य हस्तेऽश्ववल्गामर्पयित्वा भोक्तुं गतः. क्षेत्रस्वामी च यथागतं चलितः.

ततोऽश्वं फलानि च रक्षतः शङ्करस्य पञ्चसु निमेषेष्वतीतेषु शम्बरः पाठालयं गच्छन्नग्रे सन्निधाय 'सखे! शङ्कर! किमर्थमिह तिष्ठसि? कस्यायमश्वः? आसु किन्तावन्निवेशितं मञ्जूषासु'? इति पप्रच्छ. शङ्कर उवाच—'अस्मिन् पथिकविश्रमालये सम्प्रति भोक्तुं गतस्य कस्यापि पान्थस्यायमश्वः. नारङ्गफलान्यासु मञ्जूषासु वर्तन्ते. तदागमनं यावत्तद्रक्षणाय तेनाहमार्थितस्तथा करोमि. अपिच स प्रत्यागत्य फलमेकं मे पारितोषिकं दास्यति' इति. शम्बरः 'किमेकं नारङ्गफलं स दास्यति? ननु सर्वाणि त्वद्वशे वर्तन्ते?

ममैकस्मिन् फले लिप्सास्ति. पश्यानि तावत् प्रथमं तेषां कियत् पीनत्वम्' इति वदन्नेव मञ्जूषां प्रति प्रसारितकरस्तदावरणमपसारयामास; दृष्ट्वा च तानि 'अहो मनोहरणि फलानि; जानामि परिपाकमेषां स्पर्शेन' इत्युक्तवान्.

शङ्करः 'मा तावत् शम्बर! फलानि स्प्राक्षीः, यद्यात्मनो हितमिच्छसि. किं ते कार्यमेतैः पक्वैरपि वा? यानि परकीयतयोपयोक्तुं न शक्यन्त' इत्यब्रवीत्.

शम्बरः 'सत्यमेव किं भणसि? "मा स्पृश" इति. न हि स्पर्शे दोषोऽस्ति. मा खलु मन्यस्व, तान्यपहर्तुमिच्छामीति' एवं कथयन् मञ्जूषान्तः करं प्रवेशयामास; गृहीत्वा च फलमेकं कराभ्यां सम्यक् परामृश्य पुनःपुनराघ्रायावदत्—'सौरभात् फलमिदमवधारयामि मधुरं परिपक्वं च. इच्छामि चैतदास्वादयितुम्; केवलं बिन्दुमेकं फलाग्रभाजो रसस्य सद्यः पिबेयम्' इति जल्पन्नेव फलमास्ये निदधौ.

बालैर्माम सत्यशीलतामभिलषद्भिरुपस्थिते षु प्रलोभनहेतुषु सावधानैर्भाव्यम्. अल्पाल्पेनापि विषयेण जन आकृष्यमाण उत्तरोत्तरमकार्ये प्रवर्तते. पश्यत बालाः! शम्बरस्य किल फलानां दर्शनेन स्पर्शे, स्पर्शेनाघ्राणे, आघ्राणेनास्वादने च लोभो जातः.

ततः प्रतिश्रुतपालने श्रद्धालुना शङ्करेण 'फलं मा दूषय' इति सामवचनैरनुनाथितोऽपि स फलं न त्यक्तवान्; प्रत्युत 'अन्यदीये फले तव नाधिकारोऽस्ति; त्वदपेक्षया बलवन्तं मां निग्रहीतुं च न शक्नोषि; तत् तूष्णीं तिष्ठ' इत्युक्तवान्. तदा कुपितः शङ्करस्तस्य हस्तात् फलं बलाद् ग्रहीतुमयतिष्ट. क्षणेन च तयोः कलहव्यतिकरे प्रवृत्ते क्षुभितोऽश्वः फलमञ्जूषाकर्षणव्यग्रं तं दस्युं पश्चादङ्घ्रिणा तीव्रमताडयत्. तद्धशाच्च स व्यथितः साक्रन्दं भूमौ पपात. फलं च तदा तस्य हस्ताच्छङ्करो जग्राह. ततस्तदाक्रन्दं श्रुत्वा ततइतो जनास्तत्र यावदागच्छन्, तावच्चौरः शान्तव्यथ उत्थाय प्रकृतिस्थ इव तूष्णीं

स्थितः. तथापि शङ्करो यथावृत्तं जनेभ्यः प्रत्यागताय अश्वस्वामिने च वर्णयामास. 'ज्ञातपूर्वे तस्मिन् दस्यौ सर्वमेतत् सम्भाव्यत' इति सम्भूय वदत्सु, प्रशंसत्सु चापरस्य सत्यशीलतां जनेषु फलस्वामी भृशं परितुष्टः 'तात! सर्वाण्येतानि फलानि ते पारितोषिकतया ददामि; प्रतिगृहाण' इति शङ्करमुक्तवान्. 'प्राक् प्रतिश्रुतं फलमेकमेव गृह्णीयाम्, न तु ततोऽधिकम्' इति वदन्तं तं भूयोभूयः सर्वफलग्रहणाय स प्रार्थयामास. ततस्तानि फलानि स्वीकुर्वन् सत्यशीलस्तत्कालोपस्थितेभ्यः पाठालयगामिभ्यो बालेभ्यः संविभज्य स्वयमेकमेव तदुपयुक्तवान्. चौरस्तु विलक्षः सर्वैः सहस्ततालमुपहस्यमानः स्थितः. ततः प्रशस्तगुणदर्शनेन भृशं विस्मिताः प्रीताश्च सर्वे जना अश्वस्वामी च शङ्करं विविधाभिराशीर्भिरभिननन्दुः.

स च तान् यथान्यायं प्रणम्यापूर्वफलास्वादेन द्विगुणितप्रणयैर्बालैः सबहुमानमनुगम्यमानः पाठालयं ययौ.

अये बालाः! अस्याः कथायास्तात्पर्यं सम्य-
गालोच्य सदाचारपरिचयं सर्वदा कुरुध्वम्.

विश्वेश्वरे कुरुत भक्तिमपेतदम्भां
पित्रोर्मतान्यनुविधत्त निरस्तशङ्कम्।
विद्यावतामपिच पालयतोपदेशान्
विद्यां श्रियं च यदि वाञ्छथ हे! कुमाराः! ॥

समाप्तेयं तृतीया पाठावली.

शुभं भूयात्.

सूचि

NOTES.

p. l.

1 7 आत्मा—soul or mind. काय:—body or trunk.

„ 8 अष्टवितस्तिमात्र: = अष्ट वितस्तय: प्रमाणमस्य. वितस्ति:—span (a measure) = 12 angulahs.

„ 15 प्रवणाकारम्—curved.

2 3 मस्तिष्कम्—brain.

„ 7 अमुत्रफलम्—enjoyment in the next world.

„ 11 शय्योत्थायम् (अव्ययं)—hastening from the bed.

3 12 दैनन्दिनम्—daily.

„ 14 व्यायाम:—exercise.

4 4 दुनोति—v. hurts.

„ 8 निस्तलाकृति:—oval.

„ 11 मरु:—desert.

„ 13 प्रस्रवणम्—spring. हिमघन:—flakes of snow.

„ 14 नगनिम्नगा:—torrents.

5 5 लशुनम्—garlic.

„ 7 ऊपरिकपालम्—upper shell. क्रोश:—unit distance = 2 or $2\frac{1}{4}$ miles ($\frac{1}{4}$ of a yojana).

„ 13 पाथेयम्—provisions for a trip.

6 2 मान्त्सी: बन्ध् – to tie, लुङ्. माङ्योगादडभाव:.

„ 3 निर्बन्ध: – obstinacy, stubbornness, persistence.

„ 7 प्रमीतम् – died.

„ 8 प्राड्विवाक: – judge.

„ 14 कुहक: – cheat, rogue.

p. l.

8 5 व्यब्रूताम् – विरुद्धमवदताम्. वि + ब्रू लङ्.

9 11 संविभागः – distribution.

10 10 प्रयाणकम् – march.

,, 11 लुण्टितुम् – to steal.

11 1 संवासः – acquaintance.

14 4 निर्भर्त्स्य – to threaten, abuse or reproach.

15 10 उत्पुच्छयमानः – raising the tail. [do.

16 5 इतिकर्तव्यतामूढः – wholly at a loss as to what to

,, 17 प्रत्यापत्तिः – to make up for.

17 1 पर्पः – a wooden leg for the lame, a vehicle used by the lame. नालिकम् – (cartridge) gun.

,, 7 प्रसृत्वरम् – pervading, (spreading).

,, 12 भवितव्यता – fate.

,, 13 पूलः – a bundle. ग्रन्थिः – a knot.

19 12 शिशिलिद्वीपः – Sicily. एतनाभिधानः—named Etna.

21 2 अम्लम् – sour.

,, 8 सगर्धम् – greedily.

,, 14 व्यात्तम् – wide opened.

22 13 संविद् – agreement, resolution.

,, 14 यातना – acute pain.

23 4 आराद् – (अव्ययम्) distance.

,, 17 षोडशशः – at sixteen.

24 1 राजदन्तौ = दन्तानां राजानौ.

,, 3 पार्यन्तिकाः – endmost.

,, 4 जीर्णिः – digestion.

,, 13 श्रुतपूर्वी – one who has heard before.

,, 16 अजिरम् – a court-yard. [traders.

25 3 सांयात्रिकाः – merchants trading by sea. (sea-

,, 4 यथाजातः – fool.

p. l.
25 9 पटलम् - roof.
,, 12 औपवेशिकः — neighbour.
,, 13 परिवर्तयन् — one who is transposing. उल्लोलयन् = one who is stirring up.
26 7 प्ररोपितौषधि = प्ररोपिता ओषधयो यस्मिंस्तत् .
,, 9 नियतजलोपक्लृप्तिकम् = नियता जलस्योपक्लृप्तिर्यस्य तत् .
,, 12 शूकधान्यम् — any awned grain.
,, 13 शमीधान्यम् — any pulse or grain growing in pods.
,, 14 नीली — an indigo plant.
27 3 दोहदम् — *n.* manure.
,, 5 आवपनम् — a vessel.
,, 9 दीपवर्तिः — candle.
,, 11 ऊयते — *v.* being woven.
,, 12 दर्वी — spoon.
28 1 सिकलितम् — sandy.
29 6 संसृष्टदेशः — United States.
,, 8 वासिन्तनः — George Washington.
,, 11 गर्वायमाणः — haughty.
31 2 शुक्तम् — sour.
,, 7 उत्सः — spring, fountain.
,, 10 अद्धा — undoubtedly.
,, 11 प्रवालकीटः — coral, zoophyte.
33 1 कुक्कुरः — dog.
,, 3 कौलेयकः — dog. जाबालः — shepherd. [for ever.
,, 12 अशकाव. शक् — to be able. लुङ्. गतगताः — gone
34 1 निर्विद्यमानः — disgusting.
,, 4 अद्रिद्रोणी — valley.

p. l.

34 12 यत्सत्यम् – forsooth.
,, 13 पल्ली – a small village.
35 2 छद्म – deceit.
,, 5 जाहकः – cat.
,, 8 राजपट्टः – velvet, (a fine silk cloth.)
,, 12 दुग्धघनः – cheese.
,, 13 उपानत् – shoe, sappath.
,, 15 कङ्कतम् – comb.
36 15 एडकः – ram. छगलः – goat.
,, 16 खिलम् – untrampled waste.
,, 16 अपर्यस्तः – without being struck or upset.
37 2 तुभी – she-goat.
38 2 शलाटुः – unripe fruit.
,, 8 कणिशम् – an ear or spike of corn. [समासः.))
,, 14 स्खलितप्रधावितं=स्खलितेन सहितं प्रधावितम्. (मध्यमपदलोपी.
39 4 सक्तुः – flour. [made.
,, 5 श्राणा – (kanji) rice gruel. राधयित्वा – having
,, 7 कट्फलः – teak. खदिरः–name of a tree (karunkali.)
,, 11 चिञ्चा – tamarind tree.
,, 12 व्यञ्जनम् – sauce. ईतिः – scarcity, dearth.
,, 16 शिफा – a fibrous root from the branch of a tree (like that of a banyan.)
40 4 लेपः – gum (gummy fluid from a banyan tree.)
,, 14 पिचुः – cotton (without seeds).
41 2 वैधेयः – fool.
,, 11 चपेटा – palm of the hand with fingers extended.
42 12 ग्लहः – stake, bet, wager.
43 7 निषादी – an elephant-driver.

p. l.

43 14 उलूखलम् – mortar.

,, 15 शूर्पः – a winnowing basket.

,, ,, मार्जनी – a broom.

44 1 विप्रलापः – mutual contradiction.

,, 14 सञ्चरमाणः – सम्पूर्वस्य चरतेः (समस्तृतीयायुक्तात् । १. ३. ५४.) इत्यात्मनेपदम् .

45 2 दशमी – very old.

,, 6 नृशंसम् – cruel.

,, 14 पुरोभागी – fault-finding.

47 5 समाहृतगुणस्यापि ... ...

Though the epithet समाहृतगुण is applicable as well to the stalk of the lotus and bow as to a man of virtue, he cannot be compared to them since he is neither सच्छिद्र like the one nor कुटिल like the other. समाहृतगुण when applied to (1) साधु, means "possessed of good qualities" (2) मृणाल means "filled with thread" (3) चाप, means "provided with a string. The stalk is सच्छिद्र in the sense that it has many pores in it while the man is not सच्छिद्र in as much as he has no छिद्र or weak points to be assailed at. The bow is कुटिल or bent unlike the man whose walk in life is never crooked or bent but straightforward.

47 7 ऐकगुण्यमनीहायां ... ...

When you do not undertake to do any piece of work, there is only one sequel to it ; and that is, it will pay you nothing. But while you do anything, one or the other of the two will be the consequence ; either the work will bring you its reward or fail to do so.

p.	l.	
47	2	अभावः कर्मणां फलं — The reading.
		'न भवेत्कर्मणां फलं' — gives us a better construction.
,,	12	सङ्क्रमकाष्ठम् — a small wooden bridge.
48	1	गोरसः — milk, ghee, etc. of a cow.
,,	2	,, — products of the earth.
,,	3	,, affectionate look.
,,	4	,, the relish of a sentence.
,,	9	आक्रियते आ + कृ — to shape or form.
,,	10	सर्वान्तरम् — innost.
49	1	उपसमाधातुं — to collect.
,,	2	निस्संशोषं — संशोषाभावाय (अव्ययीभावः)
,,	11	निमित्तम् — an omen.
52	8	कालना — graze.
,,	11	सहकृत्वरी — co-operator.
,,	15	कृतकपुत्री —adopted daughter.
53	3	याचितकम् — (anything) borrowed for use.
54	1	व्याहरोज. वि + आ + रुज् — to break. लिट्.
,,	11	सीवनम् — stitching.
55	7	कोष्ठम् — a room.
,,	11	कञ्चुककोशः — a pocket.
56	2	रूप्यप्रतिनिधिपत्राणि — bank notes.
,,	4	कञ्चुकपेशी — a pocket.
59	3	अन्धुः — a well.
60	1	अस्वर्ग्यम् — unheavenly.
,,	2	मार्किस-वेल्लसलिः — Marquis of Wellesley.
,,	16	एकशः — one by one.
62	6	पृषदंशकः — cat.
63	1	उन्दुरुः — a mouse.

p. l.

63 4 विप्रलम्भः -- deceit.

,, 8 लालसा -- longing.

64 14 त्वरिततरव्यापारिता = त्वरिततरं व्यापरितुं शीलमस्येति तथा. तस्य भावस्तत्ता.

66 8 ऊर्जस्वलम् -- strong.

67 5 ऋणापाकरणव्यतिकरः -- clearing one's debt.

68 7 दम्भः -- vanity.

69 2 स्तेनः -- thief.

,, 10 वल्गा -- a bridle.

70 4 पारितोषिकम् -- a reward.

72 13 फलमञ्जूषाकर्षणव्यग्रः = फलपूर्णाया मञ्जूषाया आकर्षणे व्यग्रः.

73 11 विलक्षः -- ashamed.